# नन्दनवनकल्पतरुः ४६



शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ।।

वि.सं. २०७७

उत्तरायणम्

सङ्कलनम्

पन्न्यासकल्याणकीर्तिविजयः



## आर्थिकं सौजन्यम्

नन्दनवनकल्पतरोः षट्चत्वारिंश्याः शाखायाः प्रकाशने **सावरकुण्डलानगर-सत्केन श्रीविशाश्रीमाळी-श्वेताम्बर-मूर्त्तिपूजक-जैनसङ्घेन** सम्पूर्ण आर्थिकः सहयोगः कृतोऽस्तीति तदर्थं बहुशो धन्यवादाः ।

# [illegible]

- कल्याणकीर्तिविजयः

कश्चन साधुः स्वशिष्यैः सह नदीतटे चङ्क्रम्यमाण आसीत् । स हि विश्रुतो विद्वानासीत् । नैकग्रन्थानपि विरचितवानासीत् सः । धार्मिकजनेषु जिज्ञासुषु च तस्य बहु प्रसिद्धिरासीत् ।

प्रसिद्धिः खल्वेषा कदाचित् सुफलं कदाचिच्च कुफलमपि वितनुते । केचन जनाः प्रशंसका भवन्ति, केचन तु विनैव कारणं निन्दका अपि भवन्ति ।

अद्य तु साधोर्दौर्भाग्यस्योदयो जात इव कश्चन निन्दकः पुर एवाऽमिलत् । साधुं दृष्ट्वैव स गालिप्रदानमारभत । अथ साधुरपि समतावत्त्वात् सौम्यस्वभावत्वाच्च तच्छब्दानलक्षयित्वैव स्व-कार्ये मग्नोऽवर्तत ।

साधोरेतादृशेनाऽवगणनापूर्णेन वर्तनेन स जनोऽधिकमुत्तेजितोऽभवत् साधोर्गुरुं प्रगुरूंश्च निन्दितुमारब्धो गालिप्रदानपूर्वकमेव । तादृशं गालिप्रदानं, यच्छ्रुत्वा हिममपि विलीय बाष्पायेत । किन्तु साधुस्तु हिमादप्यधिकशीतलतया घटित इव तदशृण्वन्नेवाऽग्रेसरोऽभवत् । श्रान्तेन निन्दकेन तु स्वकार्यमसाधयित्वैव यातव्यमभवत् ।

अथ साधोः शिष्या एतत् सर्वं पश्यन्त आसन् । तैः स्वगुरुः पृष्टः - भगवन् ! तेन जनेन भवते भवतो गुर्वादिभ्यश्चैतावद् गालिप्रदानं कृतं तथाऽपि कथं भवान्मनागपि तस्मै नैव कुपितः ? तदा स्मितं कृत्वाऽग्रे व्रजन् साधुर्मार्गे पतितं किञ्चन मलीमसं वस्त्रं गृहीत्वा स्वशिष्येभ्योऽन्यतमस्मै दत्तवान् कथितवांश्च - परिदधात्विदमिति । शिष्यस्तु तद् दृष्ट्वैव जुगुप्सया नासिकां मोटयित्वा तत्स्पर्शादपि भीत इव तत् परिहरन् गुरुं कथितवान् - कथमिदं मलमलिनं वस्त्रं परिधीयेत ? तदा साधुना कथितं - नन्वहमपीदमेव भवतो बोधयितुमिच्छामि यद् केनचिदस्माकमुद्दिश्य जल्पिताः कुशब्दा गालिवचनानि वा कथमस्माभिर्मनसिक्रियेरन् ? यदि वयमस्माकं सुवस्त्राणि हित्वा मलिनवस्त्राणि परिधातुं न सज्जास्तर्हि शोभनां मानसिकीं स्थितिं हित्वा केनचिदारोपितां दुष्टमानसिकीं स्थितिं कथं स्वीकुर्याम ?

******

**नन्दनवनकल्पतरुः ४६**

(षाण्मासिकी अयनपत्रिका) (उत्तरायणम्)

**सङ्कलनम्** पंन्यासः कल्याणकीर्तिविजयः

प्रकाशनम् - **श्रीअभ्युदयशिक्षणनिधिः, भावनगरम्**

**वि. सं.** २०७७, **ऐ.सं.** २०२१

**मूल्यम्** ₹ 125 /-

**अस्मिन् जालपुटे उपलभ्यते** – **www.jainelibrary.org**

email : nandanavanakalpataru99@gmail.com

**सम्पर्कसूत्रम्** **पं. कल्याणकीर्तिविजयः**

C/o Sandeep D Shah
Plot # 227, # 502 Balaji Sadan, Opp SIES School, KAS Road,
King's Circle, Matunga,Mumbai 400019.
Mo. 9820775295

**मुद्रकः** प्रतिभा ओफसेट प्रिन्टर

भावनगरम् 364001

**0278-2224679, 3004679**

**9426207609**

# वाचकानां प्रतिभाव:

(१)

नन्दनवनकल्पतरो-रायनिकस्यैव विततशाखासु ।
पञ्चाधिकचत्वारिंशच्छाखापल्लवैः सुमैः पुष्टा ॥१॥

दृष्टाऽनुभूय संस्कृत-सत्प्राकृतवाङ्मयैः फलिता ।
वैश्विकरसिकजनानां ज्ञानामृतदायिनी जयति ॥२॥

**अरैयर् श्रीरामशर्मा,**

**मेलुकोटेनगरम्** (कर्णाटराज्यम्)

(२)

मुहुर्मुहुर्नौमि । नन्दनवनकल्पतरुं सर्वदा यथासमयं प्राप्नोमि । भारतवर्षे भवता प्रकाश्यमाना पत्रिकेयं संस्कृत-प्राकृतभाषयोः परिपालनाय संवर्धनाय च बहूपकारिका वर्तते । ईदृशीं पत्रिकां सततं प्रकाशयितु-र्भवतः प्रयत्नाः अतीव स्तुत्याः । व्याकरणमनधीतवतो मादृशस्याऽल्पज्ञस्यैषा पत्रिका संस्कृत-साहित्यमहासागरे द्वीपवद् भासते । पत्रिकाया अस्याः श्लाघार्थं मम लघुनि शब्दकोषे पर्याप्ताः शब्दा अपि नैव सन्ति । वर्धतां सततमेषा पत्रिका ।

**डॉ.राजेन्द्र-जोशी**

**लोहारदा** (जि. देवास, म.प्र.)

*******

# प्रास्ताविकम्

जीवनं खलु क्षणिकमस्ति । तत्राऽपि भारतदेशे तु नितरां क्षणिकमस्ति । एतत् तथ्यमस्माभिर्गतेषु मासेषु सुतरामनुभूतम् । ऐषमस्तु सर्वत्र जगतीयमेव परिस्थितिरापन्नाऽऽसीत् । भारतं तु यथाकथमपि रक्षितं जातम् । परमद्यत्वे परिस्थितिः परावर्तिता । ओमेरिका-इझरायल-ऑस्ट्रेलिया-न्यूझीलेण्ड-योरोपीयदेशानां नागरिकाः स्वीयैः स्वच्छता-सावधानता-ऽनुशासन-निष्ठा-रोगद्रव्यनिवेशन-प्रमुखैर्गुणैः परिस्थितेरस्या क्रमशो मुक्ता जायमानाः सन्ति, कोरोना-महामारीं च निरोद्धुं प्रतिकर्तुं वा सामर्थ्यं प्राप्य स्थिरीभवन्तः पूर्ववज्जीवनं जीवितुं च प्रयतमानाः सन्ति ।

एतद्विपरीततयाऽस्मद्देशे सर्वतोऽनुशासनाभाव-स्वार्थवृत्ति-उत्तरदायित्वरहितता-प्रमाद-अनवधान-निराशा-भय-रुग्णता-मरण-सर्वकारासाफल्यादिभिर्दूषणैरवकुण्ठिता जनता परिस्थितावस्यां तथा निमग्नाऽस्ति यथा तत उत्क्रमणं तु दूरे तद्विषये विचारयितुमपि नैव समर्था । यद्यपि सर्वमपीदमस्माभिरेव साधितमस्ति । वयमेव जनसम्मर्दे गच्छामः, वयमेव सामाजिकमन्तरं नैव पालयामः, वयमेव धर्मस्य नाम्ना सर्वानपि नियमान् भञ्ज्मः, दैनन्दिनवस्तुक्रयणार्थं सम्मर्दं कुर्मः, विना कारणमेवेतस्ततोऽटामः, मुखबन्धनमुपेक्षामहे, यत्र तत्र स्पृशामः, ततो हस्तादिकं चाऽपि नैव क्षालयामः, प्रान्ते च रोगनिवारणौषधद्रव्यनिवेशनार्थमपि च नैव सज्जा भवामस्तर्हि कथमस्मादन्धकारपूर्णगह्वराद् बहिर्गन्तुं पारयिष्यामः ?

अथ चाऽद्यत्वे बहवः साम्प्रदायिका, रूढिवादिनः, धार्मिकाभासाश्च जना एवं प्रचारमपि कुर्वन्तो दृश्यन्ते यद् कोरोना-कोविड-नामको रोग एव नास्ति, एषा तु भ्रमणा, केवलं प्रतारणमेवेदं जागतिकं, सर्वेषां जनानां सत्त्वं धर्मं च हर्तुं प्रचारितमेतत् षड्यन्त्रमित्यादि । ततश्च ते रोगद्रव्यनिवेशनस्याऽपि विरोधं कुर्वाणा दृश्यमानमपि महानाशमपलपन्ति । एतादृशा जना देशस्य समाजस्य च महतीं हानिं कल्पयन्ति, यतोऽज्ञानो लोकस्तानेवाऽनुसरति ततश्च यत्कर्तव्यमूढो भूत्वा स्वच्छन्दं वर्तनं कुर्वाणः स्वनाशमेव कर्तुमुद्यतो भवति । एतादृशेभ्यो धार्मिकाभासेभ्यो जनेभ्यः सावधानीभूय विवेकपूर्णेन चित्तेन यत् किमपि समुचितं साम्प्रतं च तत् सर्वं प्रमादं त्यक्त्वा, जडतां विमुच्य, स्वयमनुशासिता भूत्वा, जागरूकतां च समाश्रित्य कर्तव्यमन्यथा कोऽपि भगवान् ईश्वरः अल्लाहो वा अस्माकं साहाय्यं कर्तुं नैवाऽऽगमिष्यति, फलतश्च महाभाग्येन लब्धमेतज्जीवनं स्वयमेव वयं विनाशयिष्यामः । एतानि तथ्यानि मनसि निश्चित्य किं वयं जागरूकाः स्वयमनुशासिताश्च भविष्यामः ?

**अक्षयतृतीया, वि.सं. २०७७** **कल्याणकीर्तिविजयः**

**भावनगरम्**

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| सोऽहं न किं स्याम्.. | कल्याणकीर्तिविजयः | 1 |
| श्रीकदम्बाष्टकम् | स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः | 3 |
| श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम् | वाचकश्रीसहजकीर्तिगणी | 5 |
| गान्धिगीतम् | प्रा.अभिराज-राजेन्द्रमिश्रः | 10 |
| मयूरदूतम् (खण्डकाव्यम्) | स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः | 16 |
| आस्वादः | | |
| मेलनम् | मुनित्यागमण्डनविजयः | 26 |
| जीवनस्य शिक्षणम् | मुनित्यागमण्डनविजयः | 27 |
| संगामसीसे इव नागराया | मुनिमुक्तिमण्डनविजयः | 28 |
| मेलकस्य क्रीडा | सा.विजयलेखाश्रीः | 30 |
| ग्रन्थसमीक्षा | | |
| सन्मतितर्कः | | 33 |
| शाश्वती | | 35 |
| कथा | | |
| संस्कारप्रपा | पं.अक्षयरत्नविजयः गणी | 38 |
| सत्यं मित्रम् | मुनिआत्मकीर्तिविजयः | 43 |
| स्वार्थस्वरूपम् | मुनिनिर्ग्रन्थचन्द्रविजयः | 45 |
| सुश्रावकः आभड(आम्रभट्ट)श्रेष्ठी | मुनिज्ञानयोगविजयः | 47 |
| यादृशी श्रद्धा तादृशी सिद्धिः | सा.हंसलेखाश्रीः | 48 |
| भगवान् मयि स्निह्यति | सा.तत्त्वनन्दिताश्रीः | 49 |
| ध्येयात् कियद् दूरम् ? | प्रा. तन्मयभाई शाह | 51 |
| शब्दपूरणी | मुनिनिर्ग्रन्थचन्द्रविजयः | 52 |

| | | |
|---|---|---|
| **मर्म नर्म** | कल्याणकीर्तिविजयः / **सा.ज्ञानश्रद्धाश्रीः** | 54 |
| **प्राकृतविभागः** | | |
| **चन्द्रलेखाचरितम् (संस्कृतच्छायासहितम्)** | आ.विजयकस्तूरसूरयः | 56 |
| **पाइयविन्नाणकहा** | आ.विजयकस्तूरसूरयः | 92 |

## परमपवित्रे श्रीशत्रुञ्जयमहातीर्थे
## प्रथमतीर्थपति-श्रीऋषभदेवस्वामिने विज्ञप्तिः
## सोऽहं न किं स्याम् ...?

- कल्याणकीर्तिविजयः

राजादने पुण्यतरौ वसन्नु
शृण्वन् गुणान् सङ्घजनैः सुगीतान् ।
नृत्यन् पुरस्तात् तव देव ! बाढं
सोऽहं न किं स्यां नु मयूरपोतः ? ॥१॥

पादारविन्दे शरणं प्रपन्नः
हस्ताम्बुजे भक्तिभरान्निषण्णः ।
रसं पिबन् प्राशमिकं मुखाब्जात्
सोऽहं न किं स्यां ननु चञ्चरीकः ? ॥२॥

सुकोमलं शुद्धतरं सुगन्धि
प्रफुल्लितं प्रोज्ज्वलपत्रयुक्तम् ।
तवाऽङ्घ्रिपीठे महितं हि भक्त्या
सोऽहं न किं स्यां सरसं प्रसूनम् ? ॥३॥

सच्छीतलं सौरभयुङ् मनोज्ञं
सुनिर्मलं सज्जनचित्तवच्च ।
त्वच्छीर्षन्यस्तं त्वभिषेककाले
सोऽहं न किं वारि नु सौरकुण्डम् ? ॥४॥

गोशीर्षको वा मलयाद्रिजातः
शीतांशुगौरः प्रसरत्सुगन्धः ।
नाथ ! त्वदङ्गे नु विलिप्यमानः
सोऽहं न किं स्यां ननु गन्धसारः? ॥५॥

शुद्धः सितश्चारुरखण्डरूपो
वर्धाप्यमानः किल मङ्गलार्थम् ।
नाभेय ! भक्तैः पुरतो हि यत् ते
सोऽहं न किं स्यां शुचितण्डुलौघः? ॥६॥

त्वद्दर्शनार्थं तव पूजनार्थं
त्वद्वन्दनार्थं रभसोल्लसन्ती ।
त्वन्नेत्रनिर्यत्करुणाम्बुपाना
सोऽहं न किं स्यां विरहातुराङ्गी ? ॥७॥

संसारकारागृहवासकारं
दोषप्ररोहं बहिरात्मभावम् ।
त्यक्त्वा, प्रभो ! शुद्धगुणावलम्बी
सोऽहं कदा स्यां निजगेह-रामी ? ॥८॥

******

# श्रीकदम्बाष्टकम्

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः

अखण्डश्रियां धाम कामाभिरामः
प्रभाभारसंभासिताशेषभागः ।
महत्सिद्धि-लक्ष्मीवृतेर्मण्डपोऽयं
कदम्बोऽनिशं राजते शैलराजः ॥१॥

जगत्पावनः पावनः पावनानां
सदानन्दकन्दो मुनीनाममन्दः ।
मुहुर्वन्दनीयोऽथ वृन्दारकाणां
कदम्बोऽनिशं राजते शैलराजः ॥२॥

जपो नो तपो नो क्रियाणां कलापं
न दानं विधानं विधीनां सुधीनाम् ।
न योऽपेक्षते दर्शकाणां कदाचित्
कदम्बोऽनिशं राजते शैलराजः ॥३॥

तरोश्चारुपत्राणि सच्चामराणि
जिनेन्द्रालयो हैमनः सत्करीरम् ।
अधोवाहिनी सङ्गता सर्वतोऽस्य
कदम्बोऽनिशं राजते शैलराजः ॥४॥

जरीजृम्भदम्भोजिनी-पुञ्जसङ्गि-
सरःपुष्पसम्भारसम्मोदिताशः ।
दरीसुन्दरी-सुन्दरीणां कदम्बैः
कदम्बोऽनिशं राजते शैलराजः ॥५॥

अलं ज्ञानतानैरलं तीर्थदानै-
रलं श्रद्धधानैरलं पूज्यमानैः ।
कदम्बो मनस्यावलम्बो यदि स्यात्
कदम्बोऽनिशं राजते शैलराजः ॥६॥

महन्नीरद-श्यामकायो निकायः
सदा श्रेयसां श्रेयसां सन्निकायः ।
जगज्जागरूकोऽनुसूयो विभूतेः
कदम्बोऽनिशं राजते शैलराजः ॥७॥

कदम्बाष्टकं भक्तितोऽभक्तितो वा
पठिष्यन्ति ये पत्तले सर्वसिद्धिः ।
लुठिष्यत्यवश्यं स्ववश्येव तेषां
न तेषां क्वचिद् भीतिभीतिर्जगत्याम् ॥८॥

जगत्तीर्थोद्धारोद्धतमहिम-सन्नेमिमुनिपा-
ऽमलाङ्घ्रिद्वन्द्वाब्ज-प्रणयिवरभृङ्गामृतगुरोः ।
महत्पुण्यारण्ये सुखयतु जनानां मृदुरवः
सदा कादम्बोऽसौ कवनपटुधुरन्धरकवेः ॥९॥

जगज्जनधनावनव्रत-विचक्षणक्षान्तिभृत्
क्षमातलविभूषणो **विजयनेमिसूरीश्वरः** ।
यदीयपदपङ्कजामृतरसाप्तपुण्यप्रभा-
**धुरन्धर**कवेरियं जयतु वाक्य**कादम्बिनी** ॥१०॥

******

# श्रीफलवर्द्धिपार्श्वनाथमाहात्म्यमहाकाव्यम्

- वाचकश्रीसहजकीर्तिगणी

## शिशिरकालवर्णनात्मको द्वादशः सर्गः

शीतसंततिरुपैति वृद्धितां दुःखिलोकपरिपीडितोत्सुकाः ।
यत्र भोगिपुरुषाः प्रमोदिनः पुण्य-पापफलमेतदक्षयम् ।।१।।

सैष काल इति भव्यमण्डलीं भाषमाण इव पक्षिनिक्वणैः ।
एति सुन्दरि ! निजोन्नतिं परां दर्शयंश्च जगतः समं ततः ।।२।।

पत्र-पुष्पधनमैक्ष्य सुन्दरं दुष्टभूप इव पौरवासिनाम् ।
यः प्रिये ! हरति सर्वशाखिनां कुर्वतां रुदितमण्डजस्वनैः ।।३।।

इक्षवो रसनिषेकशालिनो भूरिवाटकसमृद्धिहेतवः ।
पौरलोकसमुदायशोभिनो वृद्धिमापुरिह पश्य सर्वतः ।।४।।

वास्त्रमेव विविधं सुखैषिण आद्रियन्त इनमण्डलं तथा
अह्नि भास्वरतरं विभावसुं स्त्रीजनं च निशि कालवेदिनः ।।५।।

कामिनीः कमनवह्निपूरिताः कामिनोऽपि परितो विभावसुम् ।
एक एव शिशिरो जिनाति तान् काल एव बलवान् प्रतीक्ष्यते ।।६।।

योषितोऽधरमलं व्रणाङ्कितं निर्व्रणं खल विधातुमक्षमाः ।
दश्यते हि शिशिरेण यामिनी कालमाप्य रमणेन सस्पृहम् ।।७।।

भूषणानि सिचयो न चेद् दिवा भर्तृयोग इतरो न चेन्निशि ।
योषितां वपुषि कां न कां शठः सैष एष कुरुते विडम्बनाम् ।।८।।

सत्यमेव वचनं हि मन्यतां भर्तृयोगरहिता विलोक्यताम् ।
दुःखपूरमृतुभिर्विधीयते सैव वेत्ति हरिणाक्षि ! वाजिनः ॥९॥रथोद्धताच्छन्दः॥

इत्थं सैषस्तरुविरहिणः पुण्यहीनान् विहाय
सर्वानन्यान् सुखयति जनान् भोगसन्तोषपोषः ।
गायद्गीतः प्रमुदितजनो याति संप्राप्तलीलो
नूनं स्थाता न भवति चिरं कोऽपि संसारवासी ॥१०॥

॥इति श्रीसहजकीर्तियतीन्द्रविरचिते**श्रीफलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये **शिशिरकाल**-वर्णनात्मको द्वादशः सर्गः॥

*****

## पार्श्वनाथ-प्रभावतीक्रीडावसन्तकालवर्णनात्मकः त्रयोदशः सर्गः

पार्श्वकुमारमथो वनपालो वक्त्यभिनम्य कृताञ्जलिरेवम् ।
नाथ ! वनं तरुराजिविराजि पादरजोभिरलङ्कुरु पूतम् ॥१॥

रम्यवचो रमणीपरिवारस्तस्य निशम्य वनं स वसन्ते ।
नृत्यति सुन्दरनर्तकवृन्दे गायति गीतगणे समियाय ॥२॥ युग्मम्॥

कुङ्कुमपुष्पनिषेकसुगन्धि नीरजनीरभरैः परिपूर्णम् ।
कुण्डमवाप्य युवा युवतीभिः क्रीडति दत्तपरस्परहस्तः ॥३॥

पुष्पबृहत्स्रजमात्मकरेणा-ऽऽदाय युवा युवतीर्दधतीः स्वाम् ।
तर्जति ताः परिरभ्य ततस्तं शासति वः किमहो करवाम ? ॥४॥

पद्मदलेन निमील्य ततोऽसा-वक्षियुगं रमणो रमणीनाम् ।
चुम्बति पद्मसुगन्धि मुखं च केलिभरं विविधं स विधत्ते ॥५॥

मण्डपमेस्य वसन्तसदृक्षं वेषमुपेत्य च सार्धममूभिः ।
पुष्पितमाम्रतरुं स विलासी तिष्ठति शिष्टमतिर्युवतीभिः ॥६॥

शाखिनमेतमभीप्सितसातं कोकिलयुग्ममतीवविलासि।
यत्र ददाति मुखेन मिथोऽदो मञ्जरिमाप्तसुखामिह पश्य ॥७॥

एष विधाय तरोः किल रूप-मस्य विभाति वसन्त इलायाम्।
भूप इवाऽण्डजसेवकवर्गै-र्गीतयशःफल-पत्रसमृद्धिः ॥८॥

पुष्पलिडागतमार्गणसंघा-वाप्तरसार्थचयः स्मररूपौ।
गुञ्जदतुच्छकसारघदासी-वृन्दविराजितभूरिनिवासाः ॥९॥

अर्जुन-बिल्व-कुरण्टक-नीप-क्षीब-पलाश-सुवेतसयोधः।
साल-प्रियाल-मधुद्रुम-मन्त्री फेनिल-पीलु-महातरुदूतः ॥१०॥

बादरसस्यवनस्पतिवल्ली-कोशधरोऽद्भुतशक्तिरशोकः।
सैन्यपतिश्च जटी वरछत्री यस्य कलिः किल कोट्टपतिः स्यात् ॥११॥

अन्यतरूपचय एवमशेषो यस्य भवेत् परिवारविशेषः।
स्त्रीरतिरेव सुतश्च विनोदोऽभ्यर्चति यं जनता द्रवदम्भात् ॥१२॥पञ्चभिः कुलकम्॥

वायुरयं शिशिरश्च सुगन्धि-र्मन्दगतिर्भवतीह मरालः।
केलिभरोत्थकुलीनसविप्रुट्-मौक्तिकमत्ति विलासिजनानाम् ॥१३॥

रक्तपटौघविभूषितदेहाः प्रीतिपरास्तरुणाश्च तरुण्यः।
भान्ति वसन्तमवाप्य मिथः स्वां रागमितिं सुधियां कथयन्ति ॥१४॥

नूतनचूर्णरजःपरिपूर्णलोचनयुग्ममिदं तरुणीनाम्।
भात्यरुणं किल कामशिखीदं वक्ति जनं विजितं समविश्वम् ॥१५॥

कुङ्कुमलिप्तकुचौ युवतीनां हारयुतौ मृगनाभिसुमध्यौ।
शेषजितौ मदनश्च समेता द्रष्टुमलं सुरभेः श्रियमेतत् ॥१६॥

बाहुयुगं रमणी-रमणानां तत्र युतं परिभाति जनानाम्।
शम्भुरयं विरजःपरिलीनो द्रष्टुमनाः सुरभिं समियाय ॥१७॥

योषितमात्मबलेन युवाऽन्यः कन्दुकवत् परिगृह्य विमुग्धाम्।
स्कन्धतटे परिरक्षति नीत्वा-ऽऽमस्तकमिः परितोषमियर्तु ॥१८॥

एवमनेकविधां रसकेलिं पश्य विवेकिनि ! कामिजनानाम् ।
प्राप्य वसन्तमनेहसमस्मिन् पुष्पमियर्त्ति समं तरुवृन्दम् ॥१९॥

शाखिपलाशगणैः कुसुमैर्वा गुच्छफलप्रकरैबहुवर्णैः ।
कामिजनस्य च केलिभिरच्छा भूः सुरभेर्नहि कस्य सुखाय ? ॥२०॥दोधकच्छन्दः॥

इत्थं क्रीडां सुरभिसमयं प्राप्य पार्श्वः कुमारः
कृत्वा सार्धं युवतिभिरलं चैत्यमासाद्य चैकम् ।
दृष्ट्वा नेमिं विमुखमनसं राज्य-राजीमतीषु
वैराग्यं सोऽलभत परमं चित्रितं भित्तिदेशे ॥२१॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते **श्रीफलवर्द्धिपार्श्वनाथ**माहात्म्ये महाकाव्ये **पार्श्व-प्रभावतीक्रीडावसन्तकाल**वर्णनात्मक-स्त्रयोदशः सर्गः ॥

*******

## अथ ग्रीष्मकालवर्णनात्मकः चतुर्दशः सर्गः

प्रिये ! सुगन्धिः प्रसरत्सुपल्लवो भ्रमद्द्विरेफोत्करशब्दसुन्दरः ।
कुनालिकालापजयारवप्रभुः महद्रसादानफलप्रसूतिकृत् ॥१॥

रविप्रतापापहृतौ विचक्षणः कठोरवाताप्तफलप्रसिद्धिभाक् ।
अनोकुहाक्षीणकुलावतंसको निदाघकाले किल सप्तपर्णकः ॥२॥युग्मम्॥

जनस्य तापं वितनोति सर्वतो निदाघमेव प्रकटीकरोति यः ।
जलस्पृहां वर्धयते मुहुर्मुहु-र्निदाघकालो रमणीशरीरवत् ॥३॥

तुषारसंचारहतप्रभाचयो रविः सकोपः शिशिरेषु वस्तुषु ।
जलादिषु स्वीयकरप्रचारतो निवर्तयामास स शीतलश्रियम् ॥४॥

तदा शशी ज्ञातहिमप्रमापणो विभावरीवस्तुचये कलाभरैः ।
स जीवयामास तुषारसन्ततिं सखा हि काले रतये विधीयते ॥५॥

समीरणोऽपीह रविप्रभागतः समुष्णभावं यतते पुनः पुनः ।
परानुवृत्तिं श्रयते बलच्युतो जिजीविषुः कीर्तियशःपराङ्मुखः ॥६॥

निदाघकालात् परितो बिभीषवो यमस्वसारं कमलं स्वरापगाम् ।
हरिर्विधाता जटिलश्च देवताः समाश्रयन्ते स्म सुखैषवः प्रिये ! ॥७॥

जलाशयैर्मेघवियोगयोगतो रसा रसाभावगता कृशाऽभवेत् ।
स्वभर्तृपर्यागमनोत्सुका सती वियोगिनी स्त्रीव दिनान्यवाहयत् ॥८॥

स्त्रियो युवानश्च दिनानि चन्दनैः सुशीतलैर्व्यञ्जनजातवायुभिः ।
सुगन्धिभिः सुन्दररक्तचन्दनै-र्नयन्ति दीर्घाणि सुखेन सद्रुतैः ॥९॥

विभावरीं चन्द्रमसः सुधारसं प्रपातिनः शीतलचन्द्रिकाभरैः ।
नयन्ति रामाः सुरताभिलाषिणो नरास्त्रियामा अपि ताः क्षणेन ॥१०॥वंशस्थच्छन्दः।

इत्थं षण्णामृतूनां नृपतिकुलभवे भोगसाताभिलाषी
लोकः प्रोन्मत्तचित्तो गमयति नृभवं धर्मकर्माप्रसक्तः ।
यः कश्चित् स्याद् विवेकी स खलु नरभवं धर्मकृत्यं वितन्वन्
साफल्यं संविधत्ते भवति शिवसुखं प्राप्य सिद्धः क्रमेण ॥११॥

इति श्रीसहजकीर्तियतीन्द्रविरचिते **फलवर्द्धिपार्श्वनाथमाहात्म्ये** महाकाव्ये
**ग्रीष्मकालवर्णनात्मक**श्चतुर्दशः सर्गः ॥

********

# गान्धिगीतम्

- प्रा.अभिराज-राजेन्द्रमिश्रः

पराधीनतातमसि यदाऽऽसीन्मग्नं भारतराष्ट्रम् ।
स्वयंज्योतिषा तदा केनचिल्लग्नमभूत् सौराष्ट्रम् ॥१

प्रथमवारमिह वैधससृष्टौ पश्चिमनीलाकाशे ।
उदितोऽभूत् कश्चिद् दिवाकरो मासे कमलविलासे ॥२

आनर्ताख्ये विमलजनपदे मङ्गलवृत्तसमृद्धे ।
जननिधिवेलालालितचरणे सुभगव्यतिकरसिद्धे ॥३

**पोरबन्दरे** सौख्यमन्दिरे **कर्मचन्द**परिवारे ।
लेभे जनिं स **मोहनदासो** रसो यथा कल्हारे ॥४

को नु वेद यदयं भविता किल राष्ट्रपिता जननेता ।
अनाचारघस्मरयुद्धानां शस्त्रविहीनो जेता ? ॥५

महामहिमशाली वामन इव स खलु विलक्षणबालः ।
शक्तिमदान्धधवलकृत्तीनामभवत् कालव्यालः ॥६

सत्याऽहिंसाऽसहयोगत्रितयेन पदन्यासेन ।
मितवान्निखिलभूतलं गान्धी केवलमात्मबलेन ॥७

यदचिन्तयत्तदेव जनानां कृतेऽभवत् करणीयम् ।
यदवोचन्मन्त्रात्मकसत्यं जातं तद् वरणीयम् ॥८

अमृतसिद्धियोगोऽसौ जातो यस्मिन् क्षणे प्रतस्थे ।
राष्ट्रमलोकि हन्त निःस्पन्दं शान्तो यदाऽवतस्थे ॥९

यत्राऽगच्छत् सोऽभून्मार्गो लक्ष-कोटिगमनीयः ।
यच्चकार तद् व्रतं पवित्रं जातं सदसि महीयः ॥१०

भारतराष्ट्रं पृथुकलेवरं तस्याऽऽत्माभूद् गान्धी ।
कोटिकोटिदीनार्तजनानां परमात्माऽभूद् गान्धी ॥११

सत्याग्रहं प्रयुज्य शस्त्रमिव दुराचारदर्पघ्नम् ।
विजयमवाप्य दक्षिणाफ्रीकाभूमौ ध्वंसितविघ्नम् ॥१२

शक्तिदुर्मदं निखिलभूतलं कृत्वा विस्मयलीनम् ।
महासमरविजयी गान्धी भारतमागच्छद् दीनम् ॥१३

महामोहनिद्रावशङ्गता विस्मृतविगतैश्वर्या ।
जनता यत्र जिजीव जीवनं पशुतुल्यं हतवीर्या ॥१४

भुवि निपत्य वदनोदरदर्शनकुशला यत्र नृपालाः ।
श्वान इवाऽऽसन् पिण्डदगौराङ्गानामाज्ञापालाः ॥१५

भिन्नबुद्धयो भिन्नरहस्याः स्वार्थसिद्धिसुखविद्धाः ।
राष्ट्रप्रणयमुपेक्ष्य परस्परमनुदिनमेवं विरुद्धाः ॥१६

दास्यनिगडजटिलेऽपि भारते न मनागपि ते विद्धाः ।
गौराङ्गप्रभुचरणचारणा आसन् मुक्तिविरुद्धाः ॥१७

स्वाभिमानिनो राष्ट्रसेवकाः दास्योन्मूलनरक्ताः ।
इन्कलाब-वादिनः शातिता नित्यमेव भूभक्ताः ॥१८

सर्वमिदं निपुणं निरीक्ष्य जनतार्तिविदारणकामः ।
सञ्चक्लृपे मोहनदासो राष्ट्रोद्धाराय ललामः ॥१९

स्वाधीनतासमरसूत्रं धृत्वा करयोः सेनानी ।
आजुहाव गौराङ्गकदर्यान् रणभूमावतिमानी ॥२०

ग्रामे ग्रामे नगरे नगरे पथि पथि भारतखण्डे ।
प्रजज्वाल दास्योन्मूलनदक्षोऽग्निः मुण्डे मुण्डे ॥२१

रौलटबिल्-साइमनकमीशन्-सर्वमिदं प्रतिरुद्धम् ।
असहयोगभावनया सर्वत्राऽपि घोषितं युद्धम् ॥२२

न्यायालयं जहुर्वाक्कीला गुरवः शिक्षास्थानम् ।
अधिकारिणो जहुर्नृपसेवां प्राज्ञा नृपसम्मानम् ॥२३

राष्ट्रकृते परमेश्वरवागिव मतो गान्धिनिर्देशः ।
कोणे कोणे भरतधरायाः शिरोधार्यसन्देशः ॥२४

हतप्रभं गौराङ्गशासनं निष्क्रियमिव सञ्जातम् ।
दर्शं दर्शं निजसुखसौधे दारुणकुलिशनिपातम् ॥२५

कान्दिशीकबुद्धिभिस्तैस्तदा दमनचक्रमनुयातम् ।
प्रतिवृक्षं शूलं प्रतिभवनं कारागारं जातम् ॥२६

नैव चचाल चकम्पे गान्धी नो वाऽत्यजत् स्वधैर्यम् ।
महामन्त्रमुद्घोष्य नवीनं विदधे स्वजने स्थैर्यम् ॥२७

अपसारय दासताकलङ्कं धर्मोऽयं भवदीयः ।
कुरु किञ्चिन् म्रियतामथवा पन्था नाऽन्योऽस्ति तृतीयः ॥२८

धर्मोऽयं मन्त्रोऽयं भवतामेषा गान्धीवाणी ।
परतन्त्रा न स्थास्यति सम्प्रति भारतभूः कल्याणी ॥२९

पायं पायं राष्ट्रपितुर्वचनामृतमेतदमोघम् ।
निखिलमेव राष्ट्रं सञ्जातं दीपितकण्ठविरोधम् ॥३०

अङ्ग-बङ्ग-काशी-कोसल-चम्पारन-विन्ध्य-कलिङ्गाः ।
आन्ध्र-तमिल-कर्णाटक-केरला गूर्जर-मरु-भूसङ्घाः ॥३१

असम-पञ्चनद-हिमगिरिशिखराश्चक्रन्दुः समवेताः ।
आङ्ग्लशासका ! जहित भारतं जहित जहित भोः प्रेताः ! ॥३२

सुखिनी धरा भवत्वस्माकं विश्वबन्धुतालीनाः ।
अलङ्करोतु पुनर्मे राष्ट्रं विश्वगुरोर्महिमानम् ।।३३

सङ्केतं गान्धिनोऽवाप्य सर्वेऽपि भारतीभक्ताः ।
शासनसेवां जहुर्झटिति वैदेशिकवेषविरक्ताः ।।३४

स्थाने स्थाने वैदेशिकवस्त्राणां दहनं जातम् ।
वीता निशाऽवमानकारिणी दृष्टं नवप्रभातम् ।।३५

मुष्टिमिता निजराष्ट्रमृत्तिका स्वर्णमयी सञ्जाता ।
विश्वमानचित्रेऽवलोकिता महिता भारतमाता ।।३६

बर्बराङ्ग्लशासनं धिक्कृतं निखिले खलु संसारे ।
स्वाधीनतामन्दरो ददृशे नृपनय-पारावारे ।।३७

शतसहस्रसङ्ख्यका निगडिता मुक्तिसमरयोद्धारः ।
निष्कासिताः शातिता निहता मुक्त्यध्वरहोतारः ।।३८

सर्वस्वं लुठितं पिशाचैर्विहिता अत्याचाराः ।
व्याप्ता दिक्षु विदिक्षु भारते क्रन्दनहाहाकाराः ।।३९

यावच्छक्यं विहितमकृत्यं पाशविकं विकरालम् ।
निर्वापितो न मुक्तिमखाग्निस्तदपि विकीर्णज्वालम् ।।४०

अभ्रंल्लिहशिखरस्समदृश्यत हिमाचलो ननु गान्धी ।
निरवधिगहनगभीरोऽलक्ष्यत महासागरो गान्धी ।।४१

आङ्ग्लानां सुभगम्मन्यानां कृतेऽपि गूढो गान्धी ।
चक्रव्यूहसन्निभो जटिलोऽभून्निर्व्यूढो गान्धी ।।४२

अभितः परितो हन्त सर्वतो ब्रिटिशशासनं गान्धी ।
नीचैरुपरि दक्षिणे वामे गौराङ्गानां गान्धी ।।४३

मृतो यथा जीवन्नपि लङ्कापती राघवातङ्कात् ।
ब्रिटिशशासनं ननु विध्वस्तं तथा मोहनातङ्कात् ।।४४

श्वसनमप्यभूद् दुष्करमेषां प्रसरत्थूथूत्कारे।
खद्योतानां यथा दुर्दशा दिवसे प्रभाप्रसारे ॥४५

शुद्धं बुद्धं बद्धपरिकरं वीक्ष्य भारतं स्फीतम्।
समादधुश्शासका यदधुना वैभवदिवसं वीतम् ॥४६

कण्ठीरवपोतका भारतीपुत्रा दिशि ढौकन्ते।
कथमेते गोमायुशासनं क्षणमपि हन्त सहन्ते ॥४७

तस्माद् वरमधुनाऽऽत्मरक्षणं हित्वा भारतदेशम्।
नाट्येऽवसिते शैलूषोऽपि त्यजति हैतुकं वेषम् ॥४८

एवमादि निर्णीय मनसि घोषितवन्तः स्वातन्त्र्यम्।
भारतराष्ट्रमभूद् दासतामुक्तं भूतलवन्द्यम् ॥४९

शैल-जलधि-रस-चन्द्रमिते(1947) खिस्ताब्देऽप्यगस्तमासे।
पञ्चदशे दिवसेऽथ निशीथे स्वाधीनता बभासे ॥५०

ध्वजस्त्रिवर्णो मुक्ताकाशे दोधूयते स्म चित्रम्।
भारतराष्ट्रं भविष्यमङ्गलं व्यतरत् परमपवित्रम् ॥५१

सङ्कल्पं परिपूर्य निर्वृतिं परमामवाप गान्धी।
राष्ट्रपितेति बोधितः सर्वैः सुषमामवाप गान्धी ॥५२

मुक्तिं दत्त्वा मुक्तिदूतगरिमाणं यातो गान्धी।
मनुजस्सन्नपि वृन्दारकमहिमानं यातो गान्धी ॥५३

हत्वा ननु समाजवैषम्यं समतां प्रददे गान्धी।
समालिङ्ग्य ननु दीनदरिद्रान् प्रियतां विदधे गान्धी ॥५४

सर्वधर्मसमभावमुपचरन् मृदुतां लेभे गान्धी।
सर्वोदयसन्देशं वितरन् सुरतां लेभे गान्धी ॥५५

भारतीयसंस्कृतेः सौरभं जगति व्यतरद् गान्धी।
अजरामरं विधाय भारतं परिमुक्तोऽभूद् गान्धी ॥५६

भूत्वा नरोऽपि नारायणतां कृत्यैरवाप गान्धी ।
आत्मानं प्रविकीर्य पुष्पतां गन्धैरवाप गान्धी ॥५७

सञ्जातोऽपि गूर्जरे राज्ये भारतमभवद् गान्धी ।
जगत्प्रपञ्चेऽप्यासक्तः सत्यामृतमभवद् गान्धी ॥५८

मिश्रोऽभिराजराजेन्द्रो देववाणीसमर्चकः ।
विश्वविद्यालये रम्ये शिमलायां प्रतिष्ठिते ॥५९
समादृत्य सुहृद्वाक्यं गौतमीयं विकस्वरम् ।
गान्धिगीतमिदं प्रीतं सद्यो व्यरचयन्मुदा ॥६०
शर-ग्रह-ग्रहेन्द्वब्दे (1995) ख्रैस्ते मासि दिसम्बरे ।
प्रणीतं सप्तविंशेऽह्नि गान्धिगीतमिदं बुधे ॥६१

*******

# मयूरदूतम् (खण्डकाव्यम्)

(स्वोपज्ञपञ्जिकावृत्तिसमेतम्)

- स्व.आ.श्रीविजयधर्मधुरन्धरसूरयः

(शिखरिणीच्छन्दः)

पुरा श्रीमद्दामोदरजिनमुखाच्छ्राद्धवृषभः
स्वकल्याणं श्रुत्वा जिनवृषभवामेयजिनतः ॥
अषाढः पार्श्वीयां प्रतिकृतिमकार्षीदभिमता-
मिहामूमर्चित्वाऽजनि स दिवि वैमानिकसुरः ॥६२॥
स सम्यक् तत्राऽमूं चिरसमयमानर्च विधिना,
ततश्चन्द्रैः सूर्यैरपि च महिता नागविबुधैः ॥
जरां दूरीकर्तुं वलिभवनतो नेमिवचना-
त्तपस्तप्त्वा प्रापद्धरिरिह परां तां प्रतिकृतिम् ॥६३॥
यदस्मिन् श्रीनेमिस्त्रिदिनमथ यावद्ध्वनयति-
स्म शङ्खं तत्रेदं नगरमवसच्छङ्खपुरकम् ॥
ततोऽयं श्रीशङ्खेश्वर इति समाख्यापरिचितः,
सदा पार्श्वस्वामी प्रणिवसति शङ्खेश्वरपुरे ॥६४॥
त्वमप्यस्मिन्तीर्थङ्करवरमलं वीक्ष्य विधिवत् ,
समृद्धां भावार्चां विषयविनिवृत्तेन मनसा ॥
विधेहि श्रीसार्वो वितरति मनोवाञ्छितफलं,
स्मृतो भक्त्या भव्यैः किमुत यदि दृष्टः प्रभवति ॥६५॥

(६२-६५ वि०) श्रीशङ्खेश्वरपार्थनाथप्रभोरैतिह्यवृत्तवर्णनपूर्वकं भावपूर्वकं तद्दर्शनपूजन-विरचनाय कथनं मयूरं प्रति । **श्राद्धवृषभः** – प्रधानश्रमणोपासकः, श्राद्धः वृषभ इव इति श्राद्धवृषभः *उपमेयं व्याघ्राद्यैः साम्यानुक्तौ* ।३।१।१०२। इति उपमितसमासः । **जिनवृषभेति** – अर्हच्छ्रेष्ठ-पार्श्वनाथप्रभोः,

वामाया अपत्यं पुमान् – **वामेयः**, *ङ्याप्त्यूङः* ।६।१।७०। इत्यपत्यार्थे एयण्, स चाऽसौ जिनः वामेयजिनस्तस्मात् । **पार्श्वीयाम्** – पार्श्वसम्बन्धिनीम्, श्रीपार्श्वप्रभोरितियावत्, **प्रतिकृतिम्** – प्रतिमां मूर्तिमितियावत् । **दिवि** -स्वर्गे, **आनर्च** – पूजां चकार, **हरिः** – श्रीकृष्ण-वासुदेवः । **श्रीसार्वः** – सर्वेभ्यो हितः सार्वः, *सर्वाण्णो वा* ।७।१।४३। इति विकल्पेन णः, तीर्थकरश्रिया युक्तः सार्वैः श्रीसार्वः ॥६२-६३-६४-६५॥

**अथातो गन्तव्यं विहग ! वढवाणाख्यनगरं,**
**क्रियादक्षैः श्राद्धैरमलचरितैर्भूषिततरम् ॥**
**महावीरस्तीर्थङ्करवर इहाऽऽस्तेऽतिविलसत्-**
**प्रतापः स्मर्तॄणां निविडकलुषच्छेदभिदुरः ॥६६॥**
**इहाऽयं संराजत्यमरवरसम्पूजितपदो,**
**जिनेन्द्रो यस्योच्चैर्विरचयति पूजां बहुविधाम् ॥**
**इहत्यश्रद्धालुर्नियमितसदाचारकुशलो,**
**मुदा श्राद्धस्सर्वः सकलमपि सङ्घं स यजते ॥६७॥**
**प्रभावात् सार्वाणा-मिह हि न च कोऽपि क्षतधनो,**
**वशाजानिर्नैवं मृतसुतजनो नो पुरवरे ।**
**जिनेन्द्रे नोऽभक्तो गुरुषु जनकेषु ह्यतिथिषु,**
**प्रमादी नो दीनो भवति न च निन्द्योऽप्यविनयी ॥६८॥**
**प्रजारक्षादक्षो नृपतिरिदमीयोऽतिविनयी,**
**सदा धर्मश्लाघी प्रथितसुयशाः क्षान्तहृदयः ॥**
**यदीये सद्राज्ये विगतभयशङ्का वनचरा,**
**निराबाधं भ्राम्यन्त्यनिशमिह रम्ये पुरवरे ॥६९॥**

(६६-६९ वि०) प्रभुश्रीवर्धमानविभुविभूषित-प्रमुभक्तिकरणैकबद्धचित्त-श्रद्धायुक्तश्राद्धसङ्घ-खचित-सुभगसमृद्धभक्तजनतानिचितदक्षधर्मिष्ठदयामति-मृगयाप्रतिबन्धकराजितश्रीवर्धमाननगर-(वढवाणपुर)वर्णनम् । **तीर्थङ्करवरः** – तीर्थं करोतीत्येवं शील: *हेतुतच्छीलानुकूले* ।५।१।१०३। इति टः तीर्थकरः, *नवाऽखित्कृदन्ते रात्रेः* ।३।२।११७। इत्यत्र शिष्टप्रयोगानुरोधेन *नवा खित्कृदन्तः* इत्येकं योगं, रात्रेः इत्यपरं योगं विभज्य पूर्वयोगेन वैकल्पिकमान्तादेशः, इति तीर्थङ्करः, स चाऽसौ वरः श्रेष्ठः तीर्थङ्करवरः । **निबिडकलुषच्छेदभिदुरः** – सघनपापप्रणाशकुलिशासदृशः, निबिडं च तत् कलुषं – पापं – तस्य छेदे भेदे भिदुरः वज्रमिव वज्रं भिनत्तीत्येवं शीलं भिदुरं, *वेत्तिच्छिदभिदः कित्* ५।२।७५।

इति किद्-घुरः । **इहत्यश्रद्धालुः** – अत्रत्यश्रद्धाशीलः, इह तिष्ठतीति – इहत्यः *क्वेहामात्रतस्त्यच्* ६।३।१६। इति त्यच् । श्रद्धत्ते इत्येवंशीलः श्रद्धालुः, श्रत्पूर्वकाद्धातोः *शीङ्श्रद्धानिद्रातन्द्रादयिपतिगृहिस्पृहेरालुः* ।५।२।३७। इति शीलार्थ आलुः श्रद्धालुः । **वशा-जानिः** – वशा – वन्ध्या – जाया – भार्या यस्य सः वशाजानिः – *जायाया जानिः* ।७।३।१६४। इति जायाया जान्यादेशः । **इदमीयः** – एतन्नगरसम्बन्धी *त्यदादिः* ।६।१।७। इति त्यदादेः दु-संज्ञा, *दो-रीयः* ।६।३।३२। इति ईयः, सम्बन्धार्थे इदमीयः, यदीये इत्यत्राऽपि निरुक्तप्रक्रियाऽनुसर्तव्या । **धर्मश्लाघी** – धर्मप्रशंसकः । **भ्राम्यन्ति** – चरन्ति, *भ्राशभ्लाशभ्रम्* ३।४।७३। इति विकल्पेन श्यः, *शमसप्तकस्य श्ये* ४।२।१११। इति दीर्घः ॥६६-६७-६८-६९॥

**जिनेन्द्रः श्रीशान्तिर्वितरति यतः शान्तिमधिका-**
**मतः शान्ता भव्या भविकजनवद्-ग्रामलिमडी ॥**
**प्रभूणां सच्चैत्यत्रितयमिह संराजतितरां,**
**स्वभक्तेभ्यो दातुं दुरधिगमरत्नत्रयमहो ॥७०॥**
**प्रभोर्भक्त्या केचित्कनकमयपात्रेऽतिविशदे,**
**पयो दीपं धूपं कुसुममथ नैवेद्यनिकरम् ॥**
**तथा सत्कर्पूरं मलयजरसं केसरयुतं,**
**गृहीत्वा निर्दुष्टं जिनपतिमिहाऽर्चन्ति विधिवत् ॥७१॥**

(७०-७१ वि० ) श्रीशान्तिनाथसनाथित-लिम्बडीनगरस्य तत्रत्यचैत्यत्रयस्य विविधोपकरणैः प्रभुपूजाकरणैकबद्धचित्तजनतायाश्च वर्णनम् । **सच्चैत्यं** – शोभनञ्च तत् चैत्यं – जिनमन्दिरं, सच्चैत्यं, चीयते धर्मादिकं यत्रेति चैत्यं, *शिक्यास्याढ्यमध्य०* – उणादि-३६४ । इति य-प्रत्ययो वृद्धिश्च । **त्रितयं** – त्रिसङ्ख्याकं, त्रयोऽवयवा अस्येति त्रितयम्, *अवयवात्तयट्* ।७।१।१५१। इति सङ्ख्याया अवयवे तयट् । **दुरधिगमे**ति – दुष्प्राप्यदर्शनज्ञानचारित्राख्यरत्नत्रयीं, त्रयो-ऽवयवा अस्येति त्रयं *द्वित्रिभ्यामयड् वा* ।७।१।१५२। इति अयट् – वैकल्पिकः । **मलयजरसं** – मलयाचलजातचन्दनद्रवम् । *गन्धसारो मलयजश्चन्दने* ।३।३०५। - इति हैमः ॥७०-७१॥

**इहत्यो भूपालो गुणगणचितो 'दौलत' इति,**
**क्षमिष्ठः सिंहान्तः प्रभवति नितान्तं सुकृतिषु ॥**
**असौ धर्माचार्यादलभत सुबोधं मम गुरोः**
**सुधीनां वैमत्यं सुकृतकरणे नैव भवति ॥७२॥**

(७२ वि० )अत्रत्यनृपतेः श्रीदौलतसिंहाभिधस्य पूज्यगुरुप्रवरबहुमान-सुकृतकरणादिरुचिवर्णनम् । **गुणगणचितः** – सद्गुणसमूहसमन्वितः । **क्षमिष्ठः** – अतिशयक्षमावान् । *गुणाङ्गादवेष्ठेयसू* ।७।३।९। इत्यतिशायने इष्ठः । **असाविति** – अयं भावः, मुनिरसनिधिचन्द्रेऽब्दे पूज्यपाद-शासनसम्राड्-गुरुप्रवराचार्यवर्यश्रीमद्विजयनेमिसूरीश्वरमहाराजैः शिष्यादि-समन्वितैः लिंबडीनगर-भूमिः पवित्रिता निजकमलदलसुकोमलक्रमकमलाभ्यां, श्रीमतामुपदेश्रवणाय समुत्कण्ठिता समस्तजनता, प्रतिदिनं सहस्रशो जना व्याख्यानशालायां समागच्छन्ति स्म, श्रीदौलतसिंह-नामकनरपतिरपि परित्यज्य राज्यकार्यं प्रतिदिनं सपरिवारं प्रवचनमाकर्णयितुं समभ्येति स्म, व्याख्यानसमाप्त्यनन्तरमपि होरां यावद् विविधाध्यात्मिकवार्तां श्रीगुरुमुखाच्छ्रोतुं तत्परः सन् तिष्ठति स्म । म्लेच्छ-चाण्डाल-प्रमुखा-न्त्यजानामपि पूज्यगुरुवरोपदेशश्रवणाय प्रबलेच्छा सञ्जाता, तेषां श्रवणसौकर्यायोपवेशन-सौविध्याय च व्याख्यानगृहभित्तिं दूरे वस्त्रगृहमेकं (तम्बू) विरचय्य सर्वान् सदुपदेशश्रावणेन संतोषयन् स्वयमपि राजा सुबोधं प्राप्तवान् । मेघगर्जनगभीरया गिरा पूज्यपादाः सर्वानुपदिशन्ति स्मः । **वैमत्यं** – असम्मतिः, विमतस्य भावः विमतिरेव वा वैमत्यम् । *अर्थान्तरन्यासालङ्कारः* ॥७२॥

**ततस्त्वं प्राचीनं विविधसुषमाचारुनिचितं,**
**समृद्धं सत्सेव्यं सर समुचितं राणपुरकम् ॥**
**यदन्तः प्रोत्तुङ्गं जिनवरप्रभोर्मन्दिरयुगं,**
**प्रकृष्टं साम्राज्यं प्रकटयति पौराणिकमदः ॥७३॥**

(७३ वि० ) मार्गस्थ**राणपुरनगर**-वर्णनम् । **विविधसुषमेति** – नानाप्रकारपरमशोभा-सौन्दर्य-समन्वितं,, सुष्ठु समा सुषमा *निर्दुःसुवे* ।२।३।५६। इति षत्वं, *सुषमा परमा शोभेत्यमरः* । **सर** – गच्छ । **प्रोत्तुङ्गम्** – अत्युन्नतं, प्रकर्षेण उत्ताम्यतीति प्रोत्तुङ्गं, *क-मितमि* (उ० १०७) इति डिद्-उङ्गः । **पौराणिकं** – पुरातनम् ।

**पुरी चूडाभिख्या भुवनतलचूडामणिनिभा,**
**जिनेन्द्राणां भासा समुदितविकासातिरसरसा ॥**
**यदन्तश्चैत्यस्थो वितरति जिनो वाञ्छितफलं,**
**सदा श्राद्धेभ्यस्ते नयनपथगा चारु भविता ॥७४॥**

(७१ वि० ) पथि नयनपथभवितृ-**चूडापुरी**वर्णनम् । **चूडाभिख्या** – चूडानाम्नी । **भासा** - कान्त्या प्रभयेतियावत् । **चारु** – शोभनं यथास्यात्तथेति क्रियाविशेषणम् । **अनुप्रासालङ्कारः** ॥७४॥

**ततो राजत्कोटः कुटिलजनतावासरहितो,**
**हितो नृणां विश्वे कुवलयनिभो राजतितराम् ॥**

**इहेभ्या धर्मार्थप्रवणमनसः कान्तहृदया,**
**रमन्ते सद्धर्मश्रवणकरणैकान्तरसिकाः ॥७५॥**

(७५ वि०) पथिसमायात-**राजकोट**नगरवर्णनम् । **कुटिलेति** – वक्रजननिवासशून्यः, कुटतीति – कुटिलः, *कल्यनि* (उणादि-४८१) इति इलः, कुटादित्वाद्गुणाभावश्च, जनानां समूहो जनता, *ग्रामजनबन्धुगजसहायेभ्यस्तल्* ।६।२।२८। इति समूहार्थे तल्, लित्त्वात् स्त्रीत्वम् । **कुवलयनिभः** – उत्पलसदृशः, प्रख्यवत् समानार्थकस्य निभशब्दस्याऽपि उत्तरपद एव प्रयोगः ॥७५॥

**प्रतीचीं संलक्ष्य व्रज पवनसम्मोदितमना,**
**महोत्तुङ्गं शैलं निविडविपिनं कान्तविटपि ॥**
**नदीनामौद्धत्यं कलकलरुतोन्मत्तविहग-**
**व्रजं पश्यन् जिघ्रन् कमलवनसौरभ्यमधिकम् ॥७६॥**

(७६ वि० ) नैसर्गिकनगनदीविपिनपादपादिरामण्यावलोकनपूर्वकं पश्चिमां दिशं प्रतिं गमनाय कथनम् । **प्रतीचीं** – पश्चिमां, प्रत्यञ्चति रविरस्यामिति प्रतीची तां, प्रति अञ्च् -क्विप् *अञ्चः* ।२।४।३। इति-ङीः, *अञ्चेरनर्चायाम्* ४।२।४६। इति न-लुक्, *अच्च् प्राग्दीर्घश्च* ।२।१।१०४ इति अचश्चाऽऽदेशः पूर्वस्य च दीर्घः, प्रतीची । **व्रज** – गच्छ । **कान्तविटपि** - कान्ताः मनोहराः विटपिनः – वृक्षाः यत्र तत् कमनीयपादपम् । **कलकले**ति – कलकलः - कोलाहलः स एव रुतं – कूजितं, तेन उन्मत्ताः - मदमत्ता ये विहगाः – पक्षिणस्तेषां व्रजं - समूहम् ॥७६॥

**ततस्त्वं सौभाग्यात् किमपरभवाक्षय्यसुकृतात्,**
**प्रसादाद् भारत्याः किमु गुरुजनध्याननियमात् ॥**
**उताहो साधूनां वचनकरणान्मिष्टवचना-**
**दलं द्रक्ष्यस्याऽहो सुकृतिभवनं जामनगरम् ॥७७॥**

(७७ वि० ) ततो **जामनगरं** प्रभूतपुण्यप्रभावेन ते दर्शनपथि समागमिष्यतीति मयूरं प्रति कथनम् । **अपरेति** – पूर्वजन्मकृताविनाशिपुण्यात् । **अक्षय्यं** – क्षेतुं शक्यं – क्षय्यं, *क्षय्यजय्यौ शक्तौ* ।४।३।९०। इति य-प्रत्यये अयन्तादेशो निपात्यते, न क्षय्यम् – अक्षय्यम् । **उताहो** - अथवा, विकल्पेऽव्ययमिदम्, *आहो उताहो किमुत, वितर्के किं किमूत च इति* ।६।१७२। इति हैमः ॥ **द्रक्ष्यसि** – अवलोकयिष्यसि, दृश् – स्य – *अः सृजिदृशोऽकिति* ।४।४।११२। इति स्वरात् परः अकारागमः, द्रश्, *यजसृज०* ।२।१।८७। इति शस्य षत्वं, षढोः कस्सि ।२।१।६२। इति षस्य कत्वं, *नाम्यन्तस्था* ।२।३।१५। इति सस्य कत्वं, क्-ष्-संयोगे द्रक्ष्यसि ॥७७॥

**बहिर्भागे खेयप्रतिकृतिरसौ यस्य जलधिः,**
**समन्ताद्वृक्षाणां ततिरपि मनोज्ञा विलसति ।।**
**इतो वापी स्फूर्जत्कमलवनसाम्राज्यललिता,**
**प्रगुञ्जन्तो यस्या दिशि दिशि मिलिन्दाः शुशुभिरे ।।७८।।**

(७८ वि०) **जामनगर**बहिर्भागवर्णनम् । **खेयप्रतिकृतिः** – परिखासदृशः खन्यत इति खेयम् – *खेयमृषोद्ये* ।५१।३८। इति खनेः क्यप्-एकारश्च निपात्यते । **जलधिः** – समुद्रः, जलं धीयते-ऽस्मिन्निति जलधिः, *व्याप्यादाधारे* ।५।३।८८। इति दासंज्ञकादधिकरणे – किः । **ततिः** - पङ्क्तिः, तन्यते ततिः । **वापी** – दीर्घिका, उप्यतेऽस्यां पद्मादि वापिः – *कमिवमि* (उणादि ६१८) इति णिदिः ङ्यां – वापी । **मिलिन्दाः** – भ्रमराः ।।७८।।

**अगाधः कल्लोलैः समधिकपयःपूरकलितो,**
**निरावाधं स्थानं जलचरगणानां भयभृताम् ।।**
**निधानं रत्नानामसुरजनतानां कुलगृहं,**
**जनिस्थानं लक्ष्म्याजलनिधिरयं राजति भृशम् ।।७९।।**
**स्वमर्यादां जातु त्यजति न पतिरदक्षिण इव,**
**स्रवन्तीनां कासाञ्चिदपि विरतिं यो न कुरुते ।।**
**मुनीनां सत्स्वान्तप्रतिमविमलो भूमिमहिला-**
**महाकाञ्चीकल्पः स विलसति पाथोधिरधिकम् ।।८०।।**

(७९-८० वि०) **जामनगर**समीपस्थसमुद्रवर्णनम् । **अगाधः** – अतलस्पर्शी । **कल्लोलैः** – महातरङ्गैः, कल्यते कल्लते वा कल्लोलः, *पिच्छोल* (उणादि-४९५ ) इत्योलः निपातितः, तैः । **निराबाधं** – निर्विघ्नम् । **जनिस्थानं** – जन्मभूमिः, जननं – जनिः *पदिपठि* (उणादि ६०७) इति इ-प्रत्ययः । **लक्ष्म्याः** – रमायाः, लक्ष्यते इति लक्ष्मीः – *लक्षेर्मोऽन्तश्च* (उणादि-७१५) इति ई-प्रत्ययो मकारान्तादेशश्च । **जातु** – कदाचित् । **पतिर्दक्षिणः** – अनेकमहिला-समरागो दक्षिणः कथितः – इतिलक्षणलक्षितः । प्रौढा-मध्या-मुग्धाऽज्ञातयौवनादिसर्वा नायिकाः प्रति यथा दक्षिणो नायकः समभावेन वर्तते तथैवाऽयं सरित्पतिः सर्वासां मिलन्तीनां नदीनां स्वाङ्के ददात्याश्रयम् । स्नाता तिष्ठति कुन्तलेश्वरसुतेत्यादिवत् । **स्रवन्तीनां** – नदीनाम् । **विरतिं** - उदासीनतां, निषेधमिति यावत् । **सत्स्वान्तेति** – साधुहृदयवन्निर्मलः । यथा साधूनां मनः स्वच्छं तथाऽयमपीतिभावः । **भूमिमहिलेति** – अवनि-वनिताकटिविभूषणतुल्यः । महयते इति महिला *कल्पनिमहि* (उणादि-४८१) इतीलः, कञ्चते – दीप्यते कङ्च्यते – बध्यते वा काञ्चिः *कमिवमि* (उणादि-६१८) इति णौ, साधु स्त्रियां ङी

काञ्ची, रसनेतियावत् । *अतमबादेरीषदसमाप्तिकल्पप्-देश्यप्-देशीयर्* ।७।३।११। इति किञ्चिन्न्यूने कल्पप्, तथा च काञ्चीतः किञ्चिन्न्यूनः – काञ्चीकल्पः । *उत्प्रेक्षालङ्कार उपमा* च ।।७९-८०।।

**प्रभूतं व्यापारं बहुलवसुलाभेन मुदिता**
**दिगन्ते कुर्वन्ति प्रचुरधनिनः पोतवणिजः ।।**
**इहत्यं सद्द्रव्यं तरिषु समुपन्यस्य विधिवत्,**
**सदा यातायातं विदधति समुद्रेऽतिसहसा ।।८१।।**

(८१ वि०) समुद्रद्वारा दिगन्तपर्यन्तवणिग्व्यापारवर्णनम् । **बहुलेति** – पुष्कलसम्पत्प्राप्त्या । **पोतवणिजः** – सांयात्रिकाः, पोतस्य प्रवहणस्य वणिजः – व्यापारिणः – पोतवणिजः । **तरिषु** – नौकासु तरत्यनया इति तरिः, *स्वरेभ्य इः* (उणादि-६०६) इति इः ।।८१।।

**समुद्राम्भःसङ्गादधिकतरशीतोऽतिमृदुलो,**
**नभस्वाँस्तद्वेलावनविलसदेलासुरभितः ।।**
**उपेतं त्वां दूरादतिथिरिति कृत्वा सहृदयः,**
**पथि श्रान्तं कान्तं स तव परिचर्यां रचयिता ।।८२।।**

( ८२ वि० ) समुद्रसमीरणेन करिष्यमाणमयूरसपर्यावर्णनम् । **समुद्रेति** – जलधिजलसंसर्गात्, अमति – निम्नं गच्छतीति – अम्भः, *अमेर्भहौ चान्तौ'* (उणादि-९६२) इत्यस्, अन्ते भश्च । **नभस्वान्** – वायुः, नभोस्त्यस्य निवासः, नभस्वान् *न स्तं मत्वर्थे* ।१।१।२३। इति पद-संज्ञात्वाभावात् सस्य रुत्वाभावः । **तद्वेलेति** – समुद्रतटकाननविराजत्पुटीफलसुगन्धितः । **उपेतं** – प्राप्तम् । **परिचर्यां** – सेवाम् ।।८२।।

**विशालः प्राकारो दृढतरशिलाकूटरचित-**
**श्चतुर्दिक्षु स्थेयान् स्थगयति विवस्वन्तमुदितम् ।।**
**यदूर्ध्वं विन्यस्ताः कनकमणिमुक्तातिरुचिराः,**
**विराजन्तः काचाः शतमखधनुःकान्तिमजयन् ।।८३।।**

(८३ वि०) अत्रत्यप्राकारवर्णनम् । **प्राकारः** – महादुर्गः, नगरसंरक्षणाय परितो वलयित-पाषाणविशालभित्तिरचना । **दृढतरेति** – सबलप्रस्तरव्यूहविहितः । **स्थेयान्** – अतिशयेन स्थिरः *स्थिर-गुणाङ्गाद्वेष्ठेयसू* ।७।३।९। इति अतिशायने ईयसुः, *प्रिय-रात्स्थिरः* ।७।४।३८। इति स्थिरस्य स्थादेशः – स्थेयान् । **स्थगयति** – संवृणोति आच्छादयतीति यावत् घटादित्वाद्ध्रस्वता । **विवस्वन्तं** – सूर्यं, विवस्तेजोऽस्यास्तीति विवस्वान् तं, विवस्मतुः *मावर्णान्तो०* ।२।१।९४। इति मतोर्मस्य वः, *न स्तं*

*मत्वर्थे* इति रुत्वाभावः। **शतमखेति** – इन्द्रचापप्रभां, शतं मखाः - क्रतवो यस्य सः शतमखः – सुरेन्द्रः, मह्यन्ते – पूज्यन्ते देवा अत्रेति मखः, *महेरुच्यास्य वा* (उणादि-८९) इति खः हलुक् च ॥८३॥

**यदौन्नत्यं दृष्ट्वा कुतुककलिता मेघनिवहा,**
**जवात् पार्श्वं यान्तो बहुबलतया लङ्घनधिया ॥**
**निषिद्धाः प्रोन्नत्या बहिरथ रसन्तो भृशतरं,**
**मुहुर्वर्षाव्याजादिह खलु रुदन्ति प्रतिदिशम् ॥८४॥**

(८१ वि०) प्राकारप्रोच्चतावर्णनम्। **कुतुककलिताः** - कुतूहलसमन्विताः। **रसन्तः** - गर्जन्तः। *उत्प्रेक्षा* ॥८४॥

**प्रवेष्टुं यस्याऽन्तर्निजवहुलकल्लोलनिवहैः,**
**पुरप्रान्तं गत्वा वरणनिहतो लज्जित इव ॥**
**ययौ दूरं तूर्णं जलनिधिरितः खिन्नहृदयः,**
**सतां माने म्लाने मरणमथवा दूरसरणम् ॥८५॥**

(८५ वि० ) प्राकारस्य परप्रवेशवारणवर्णनम्। **वरणनिहतः** – प्राकारप्रतिहतः। *प्राकारो वरणः साल* – इत्यभि० चिन्ता०। **खिन्नहृदयः** – म्लानमानसः। *उत्प्रेक्षागर्भितार्थान्तरन्यासः* ॥८५॥

**बहिर्द्वारस्तम्भौ कनकखचितौ रत्ननिचितौ,**
**ययोर्मध्ये मुक्तामणिविलसितस्तोरणवरः ॥**
**प्रलग्ना यस्यान्तः पृथुमणिगणा भान्ति नितरां,**
**निराकृत्य ध्वान्तं कमपि जनयन्ति द्युतिचयम् ॥८६॥**

(८६ वि०) प्राकारद्वारस्तम्भवर्णनम्। **कनकखचितौ** – स्वर्णघटितौ। **रत्ननिचितौ** – मणिमण्डिताविति भावः। **तोरणवरः** – श्रेष्ठबहिर्द्वारं, **ध्वान्तम्** – अन्धकारम्, *क्षुब्धविरिब्धस्वान्त-ध्वान्त०* ।४।४।७१। इति तमस्यर्थे ध्वनेः क्तान्तो निपात्यते ध्वान्तशब्दः। **जनयन्ति** - उत्पादयन्ति, *कगेवनूजनैजॄष्-क्नस्रञ्जः* ।४।२।२५। इति ह्रस्वता ॥८६॥

**ततोऽधः संदृब्धं सदलकदलीस्तम्भयुगलं,**
**यदाधारा रेजे कुसुमकलिता चम्पकलता ॥**
**समायातान् पान्थान् निजनिरुपमैः सौरभभरै-**
**र्भृशं संप्रीणीते कमलनिवहैर्मार्गसरसी ॥८७॥**

(८७ वि०) तत्रस्थकदलीस्तम्भचम्पकलतासरःसौन्दर्यवर्णनम् । **रेजे** – शुशुभे । **पान्थान्** -पथिकान्, पन्थानं नित्यं यातीति पान्थः, *नित्यं णः पन्थश्च* ।६।४।८९। इति पथिन्-शब्दाद् गन्तरि णः, पथिन्-शब्दस्य पन्थादेशश्च । **सौरभभरैः** – आमोदसमूहैः, सुष्ठु रभते – सुरभिः, सुरभिरेव सौरभं, स्वार्थेऽण्, तस्य भरः – समूहः, तैः । **संप्रीणीते** – प्रीणयति, तृप्ति-मुत्पादयतीति यावत् । **मार्गसरसी** – मार्गस्य सरसी – तडागः मार्गसरसी, सरति जलमय इति सरः, *अस्* (उणादि-९५२) इति अस्-प्रत्ययः, गौरादित्वाद् ङी – सरसी ।।८७।।

**प्रविश्याऽन्तः पूर्णं त्रिभुवनललामं पुरवरं,**
**पवित्रं क्षेत्रं किं विबुधवरपूज्यस्य रुचिरम् ।।**
**मुनीन्द्राणां पादैः परमपरिपूतं क्षितितले,**
**समीक्षस्व प्रेम्णा प्रचुरसुकृतैर्लभ्यत इदम् ।।८८।।**

(८८ वि०) नगरान्तःप्रवेशपूर्वकं तत्प्रेक्षणाय कथनम् । **त्रिभुवनललामं** – लोकत्रयरमणीयं, **विबुधवरपूज्यस्य** – इन्द्रस्य, **रुचिरं** – मनोहरं, रोचते इति रुचिरं, *शुषीषि* ( उणादि-४१६ ) इति किद्-इरः । रुचिं रातीति वा रुचिरम् ।।८८।।

**इतो वीथी रम्या विविधजलयन्त्रैरहरह-**
**र्निषिक्ता गन्धाढ्या मृगमदचयैः पण्यनिहितैः ।।**
**क्वचिद्रम्भापूगीसरससहकारादितरुभिः,**
**पृथग्भूतातापाऽधनजनविलापाऽऽविरहिता ।।८९।।**

(८९ वि०) नगररथ्या रामण्यकथनम् । **वीथी** – रथ्या । **अहरहः** – प्रतिदिनम् । *रो लुप्यरि* ।२।१।७५। इत्युभयत्र न्-इत्यस्य रः । **मृगमदचयैः** – कस्तूरीसमूहैः । **पण्यनिहितैः** – विक्रेयार्थं स्थापितैः, पण्यते इति पण्यं, *वर्योपसर्या* ।५।१।३२। इति यान्तो निपात्यते । **रम्भेत्यादि** -कदली-सूपारि-रससौरभपूर्णा-प्रमुखप्रादपैः, रमन्तेऽस्यां रम्भा, *गृदृरमि* (उणादि-३२७) इति-भः, रम्भत इति वा । सहकारयति मेलयति स्त्री-पुंसौ इति सहकारः । **पृथग्भूतातापा** – आतपरहिता, सघनच्छायाकलितेति यावत् ।।८९।।

**कदाचित्पाथोधिः सरणिपथमागत्य सहसा,**
**वणिग्गेहाद्रत्नान्यतुलितपयःपूरमिषतः ।।**
**यथाकामं मुष्णन्नधिभुवि स रत्नाकर इति,**
**प्रतिष्ठा प्रापद्धी सुजनजनसङ्गः प्रथयते ।।९०।।**

(९० वि० )उत्प्रेक्षया नगरसमृद्धिवर्णनम् । **यथाकामं** – यथेच्छम् । **मुष्णन्** – चोरयन् । **अधि** – पादपूरणार्थमेतत् । **भुवि** – भूमौ । अधिमहीतिपाठस्तु ज्यायान् । **ही** – यतः । *उत्प्रेक्षार्थान्तरन्यासौ* ॥९०॥

**महेभ्यप्रासादेऽमलधवलकेतुः स्फुरति यत् ,**
**समेता द्रष्टुं किं नगरमिह गङ्गाऽम्बरतलात् ॥**
**गवाक्षेभ्यः शश्वन्मणिमयगृहाद्रश्मिनिचयः,**
**क्षरस्तस्या भाति प्रचुरजलसद्बिन्दुसदृशः ॥९१॥**

(९१ वि०) प्रासादध्वजवर्णनमुत्प्रेक्षया । **समेता** – समागता । **अम्बरतलात्** – गगनप्रदेशात् , अमन्त्यत्र देवा इति अम्बरं, *जठरक्रकर* (उणादि-४०३) इति अरान्तो निपातितः, अन्ये तु अम्बते शब्दायत इति अम्बरमिति व्युत्पत्तिमाचक्षते । **गवाक्षेभ्यः** - वातायनेभ्यः, गवां-किरणानामक्षि रन्ध्रमिव गवाक्षः, *अक्ष्णोऽप्राण्यङ्गे* ।७।३।८५। इत्यट्-समासान्तः, *गोर्नाम्न्यवोऽक्षे* ।१।२।२८। इत्यवादेशः । **शश्वत्** - अनिशं, सदा, सततमिति यावत्, शशति इति शश्वत्, *संश्चद्* (उणादि-८८२) इति साधु, **रश्मिनिचयः** - प्रभापुञ्जः, अश्नुते व्याप्नोति द्यामिति रश्मिः, *अ-शोरश्वादिः* इति मिः, **क्षरन्** - निःसरन् । *उत्प्रेक्षा* ॥९१॥

**मुहुः स्मारं स्मारं मथनजनिपीडां जलनिधि**
**गृहीत्वा रत्नानि क्वचिदपि निगोढुं कृतमतिः ॥**
**इहाऽमूनि न्यास्थत् सुकृतिजनभूयिष्ठनगरे,**
**समृद्धानां गेहे वसुनिवहमारक्षति जनः ॥९२॥**

(९२ वि०) नगरस्य रत्नसंरक्षणत्वेनोत्प्रेक्षणम् । **मथनज-निपीडाम्** – आलोडनजन्यदुःखं, कृद्योगे षष्ठ्याः प्राप्तावपि अव्ययकृदन्तयोगे निषेधाद् द्वितीया, एतेन रत्नगोपनकारणं सूचितम् । पुरा किल यदा मन्थनमभूत्तदा बहूनि निशामणिचन्द्र-कौस्तुभमादीनि रत्नानीतस्ततश्चलितानि कानिचिद् नष्टान्यपि, मा भूत् पुनरप्येवं रत्नक्षतिरिति रत्नानां संरक्षणकृते सुरक्षितं स्थानं रत्नाकरो विचारयामास नगरमेतच्च तद्योग्यत्वेन निश्चीय तत्र रत्नानि स्थापयामास । **निगोढुं** – संवरीतुं, गोपयितुमिति यावत्, निगुह् – तुम्, हस्य ढः, तस्य धः, धस्य ढः, ढस्य लोपः, निगोढुम् । **न्यास्थत्** – अस्थापयत् पुष्यादित्वादङि *श्वयत्यसू-वचपतःश्वास्थवोचपप्तम्* ४।३।१०३। इति अस्-धातोः अस्थादेशः, **सुकृतिजनभूयिष्ठनगरे** - प्रभूतपुण्यपुरुषपूर्णपुरे, अतिशयेन बहु इति भूयिष्ठं, *गुणाङ्गात्०* ।७।३।९। इति, इष्ठः, *बहोर्णीष्ठे भूय्* ।७।४।४०। इति इष्ठे परे बहोर्भूयादेशः । व्यञ्जितमतेनाऽस्य नगरस्य प्रामाणिकत्वम् । *उत्प्रेक्षागर्भितार्थान्तरन्यासालङ्कारः* ॥९२॥

******

आस्वादः

# मेलनम्

- मुनित्यागमण्डनविजयः

अध्यात्मशून्यं विज्ञानमेकाङ्ग्यपूर्णं चाऽस्ति। अध्यात्मस्य फलं तु सद्विचाराणां सद्भावनानां च विकास एव। विज्ञानाध्यात्मयोर्यथार्थोऽभिसम्बन्ध एव वर्तमानकालस्या-ऽऽवश्यकता। इदानीं तेजस्विन्या आधुनिकया मत्या सह पवित्राणां मानवहृदयाणामप्यावश्यकता- ऽस्ति। तत्कार्यं विज्ञानाध्यात्मयोर्मेलनेनैव भविष्यति। प्रायशो विज्ञानाध्यात्मयोर्मध्ये कलहो भवति। विज्ञानं मन्यते – " जीवनविकासार्थं सुखेन जीवनयापनार्थं वैज्ञानिकमतेरेवाऽऽवश्यकता वर्तते। अध्यात्मं तु जीवने निष्क्रियतां प्रमादं च जनयति। अध्यात्मं नाम समयव्ययात् ऋते न किमपि खलु " इति। एष अध्यात्मविषयको भ्रमोऽस्ति। वास्तविकरीत्या त्वध्यात्मं नाम किञ्चित्प्रकारकं संशोधनमेव। अध्यात्मं नामाऽऽत्मनः संशोधनं परिशीलनं च। आध्यात्मिकजनस्य सूक्ष्मरीत्या परीक्षणस्य शक्तिर्विकसति। अध्यात्मपथा गन्तुर्जीवनविषयको दृष्टिकोणो व्यापको भवति। ततो विज्ञानविषये तस्याऽरुचिर्न वर्तते ! स विज्ञानस्य विकासं तटस्थरीत्या विश्लेषयितुं सक्षमो भवति। आल्बर्ट् आइन्ष्टाइन्वर्यो वैश्विकवैज्ञानिकरूपेण प्रसिद्धोऽस्ति। किन्तु तस्य समग्रजीवनकथायाः पठनेन वयं ज्ञातुं शक्नुयामो यत् स प्रबलोऽध्यात्मवाद्यप्यासीत्। एतादृशाननेकान् दृष्टान्तानितिहासपठनेन वयमवगन्तुं शक्नुमः। ततो विज्ञानाध्यात्मयोः संघर्षो व्यर्थ एव।

अध्यात्मसंवलिता वैज्ञानिकी मतिरेव जीवनविकासार्थमावश्यकी। यथार्थमात्रायां विज्ञानाध्यात्मयोः संमिश्रणेनैव "धर्मः" समुद्भवति।

*******

आस्वादः

# जीवनस्य शिक्षणम्

**- मुनित्यागमण्डनविजयः**

कश्चित् चीनदेशीयो महादार्शनिको जीवनस्याऽन्तिमसमये मरणशय्यायां सुप्त आसीत्। तस्य शय्यां परितस्तस्याऽऽत्मीयजना अन्तेवासिनश्च शोकग्रस्ता दुःखगर्तायां च पतिता इव स्थिता आसन्। गद्गद्प्रायहृदयाणां सर्वेषां शिष्याणामक्ष्णोरश्रुबिन्दवो दृश्यन्ते स्म।

चीनदार्शनिकस्य जीवनदीपो निर्वाणप्राय आसीत्। कतिपयक्षणानामेव जीवनं तस्याऽवशिष्टमासीत्। तस्य शरीरमसह्यपीडारूपेणाऽऽप्रपदीनेनैवाऽऽच्छादितं भाति स्म। किन्तु तस्य मुखोपरि पीडाया लेशोऽपि भावो न दृश्यते स्म। एतादृश्याः पीडाया मध्येऽपि तस्याऽधरौ मन्दस्मितरूपेणाऽलङ्कारेण विराजेते स्म। कश्चिदश्रुपूर्णनेत्रः शिष्यस्तमपृच्छत् कांश्चित् प्रश्नान्। तयोः संवादोऽस्मत्कृते पथदर्शको भवेदित्यतोऽत्र प्रस्तूयते।

**शिष्यः** – भो गुरुश्रेष्ठ ! भवान् पीडायाः सागरे निमग्नः सन्नपि स्मयमानो दृश्यते। किमर्थं भवानतीव प्रसन्नोऽस्ति ?

**गुरुः** – पीडा त्वेतत्क्षणभङ्गुरस्य शरीरस्य खलु। आत्मा त्वमरोऽस्ति। एतस्य शाश्वतसत्यस्याऽनुभवनेनाऽहमतीव प्रसन्नोऽस्मि।

**शिष्यः** – आसन्नकालीनो मृत्युर्भवतो मनसि भयं नोत्पादयति ?

**गुरुः** – भयम् ! अहं तु मृत्योर्निर्मलस्य चेतोहरस्य सौन्दर्यस्याऽऽनन्दमनुभवामि। नूत्नविषयाणां शिक्षणेनैव जीवनस्य सार्थक्यं खलु। अद्याऽहं मृत्यो रहस्यं शिक्षे। तत्शिक्षणस्याऽऽनन्देनाऽऽह्लादमनुभवामि च।

ततो मन्देन स्वरेण स दार्शनिकोऽन्तिमान् शब्दानुच्चारितवान् –

"मरणं तु कियन्मात्रम्? शिक्षणस्याऽभावो हि वस्तुतो भयङ्करः।"

तत्पश्चात् पूर्णशान्त्या आभा तस्य मुखे प्रसृता। तस्य प्राणा व्यपगताः।

जीवनस्याऽन्तिमक्षणेऽपि स गुरुः शिष्यान् सहजतया बोधितवान् – "मनुष्यजीवने शिक्षणस्य प्रारम्भो जन्मक्षणेनैव भवति, मृत्युपर्यन्तं च तत्प्रक्रियाऽनवरतं प्रचलति। जीवनकालस्य प्रत्येकं क्षणोऽस्मभ्यं कामपि नवशिक्षां ददाति। अभ्यासकालानन्तरमपि शिक्षणस्य पूर्णत्वं न मन्तव्यम्। समग्रमपि जीवनं स्वयमेवोत्तमः शिक्षकोऽस्ति। य उत्तमो विद्यार्थी भवति स एव जीवनादमृतं लभते " इति।

*******

आस्वादः

# संगामसीसे इव नागराया

- मुनिमुक्तिमण्डनविजयः

जैनसाहित्ये पवित्रागमग्रन्थेषु श्रीउत्तराध्ययनसूत्रमन्यतमम् । एतस्मिन् ग्रन्थे 'साधकः कीदृशः स्याद्' इत्यस्य विवरणं प्राप्यते । तत्र साधकमुद्दिश्य 'संगामसीसे इव नागराया' इति रणमुखेषु स्थितेन नागराजेन सह साधकस्योपमितिः कृताऽस्ति । पुरस्तात् शत्रुसैन्यं कियदपि विशालं भवतु नाम, स्वकीयः क्षत्रगणः सङ्ख्यया परिमितो वा भवतु, तदप्येता मर्यादा अपरिगणय्य समरशिरसि स्थितो विक्रान्तो नागराजः सर्वसामर्थ्येन प्रसभं युध्येत । साधकेनाऽपीदृशं भाव्यम् । लक्ष्ये निश्चिते सति पुरस्तात् प्रतिकूलव्यवधानानि कियन्त्यपि भवन्तु नाम तथाऽपि ध्येयप्राप्तये कृतनिश्चयो निश्चलचेताः सन्नुत्कटं निरन्तरमग्र एव वर्धेत लक्ष्यवेधं च कुर्यात् । लक्ष्यं प्रशस्यमुताऽप्रशस्यमिति समीक्षाऽत्र न प्रस्तुता किन्तु स्वरुच्यनुगुणं ध्येयस्य वरणे कृते सति तेन कथं भवितव्यमिति विषयोऽत्र विमृष्टः ।

एतस्मिन्नवसरे सिक्खसमुदायस्य दशमगुरोः कथाऽवश्यं स्मरणीया । पूर्वं सिक्खसमुदायः भीरुहृदय आसीत् । आततायिनो विदेशिराजानोऽस्य समुदायस्य विच्छेदाय धर्मपरिवर्तनेन संहारेण वोद्युक्ता अभवन् । एतेनाऽल्पसङ्ख्यको जात एष समुदायः । नवमगुरोस्तेगबहादुरसिंहस्य शिरच्छेदः कृत औरङ्गझेबनाम्ना मोगलसम्राजा । तदा नवमगुरोर्नववर्षीयपुत्रो गोविन्दसिंहो दशमगुरुत्वेन नियुक्तः । सोऽल्पसङ्ख्यकस्याऽस्य समुदायस्य संहारं वारयितुं कृतनिश्चय आसीत् । क्व सङ्ख्यया सामर्थ्येन च चटकतुल्याः सिक्खजनाः ? क्व च सामर्थ्यशालिनः श्येनतुल्या विदेशिन आक्रमकाः । तदपि गुरुगोविन्दसिंहेनैष सङ्कल्पः कृतः –

चिडियों से मैं बाज लडाऊं ।  
गीदडों को मैं शेर बनाऊं ॥  
सवालाख से एक लडाऊं ।  
तभी गोविन्दसिंह कहाऊं ॥

चटकैः सह श्येनान् योधयेयं, भीरुजनान् सिंहतुल्यान् कारयेयं पञ्चाशत्सहस्राधिकलक्षेण सह एकं योधयेयं चेदेवाहं 'गोविन्दसिंह' इति नाम्नाऽभिधीयेत ।

तेन सिक्खजनेषूत्साहसञ्चारः कृतः। जीवनस्य नूत्ना दृष्टिस्तेन अर्पिताः। गुरोर्महता प्रयत्नेन रणवीराणां भटानां सैन्यं निर्मितम्। प्राप्तशौर्याणामेतेषां योधानां साहाय्येन सिक्खसमुदायः स्वकीयामस्मितां रक्षितुं संवर्धयितुं च कृतसङ्कल्पो जातः।

वयं सर्वेऽपि जीवने रणमुखे स्थितो रणोत्सुकश्च पराक्रमी नागराज इव निश्चितं लक्ष्यं साधयितुं कर्तव्यनिष्ठाः कार्यदक्षाश्च भवेम। एते पञ्च श्लोका एतादृशेभ्यः साधकेभ्यः समर्प्यन्ते –

साधको निश्चिते लक्ष्ये, विलग्नः कृतनिश्चयः।
येन केन प्रकारेण, समाप्नोति मनोरथम्॥

विक्रान्त नागराजः सन्, भीषणं गर्जयन् यथा।
रणमूर्धनि युध्येत, तथा लक्ष्यं स साध्यति॥

शिखरी यदि कम्पेत, नभःपातो भवेद् यदि।
यदि रुध्याद् महावातस्तथाऽप्यग्रे स वर्धते॥

प्रत्यूह इव प्राकारो, वर्त्मनि सम्मुखीभवेत्।
अतिक्रमेत निःशस्त्रः, शिरसा तं विभिद्य सः॥

तस्य कोशे न वर्तेताऽसाध्यं पदं कदाचन।
अन्त्यरक्तलवं यावत् प्रयत्नं न परित्यजेत्॥

******

---

## पदरञ्जिन्या उत्तराणि

### ★ वामतः दक्षिणम्

२. जलवाहक ६. रसना ७. लासिका ८. पाशकः १०. परम १२. द्रोणिः १३. रसाला १४. हिमं १५. नि(नी)रस १७. शलाका २२. ताण्डव २३. लोलुप २४. लीलाकमल।

### ★ उपरिष्टात् अधः

१. सैरन्ध्री २. जनाधीश ३. वागुरा ४. कलाधर ५. विकारः ८. पाणिनि ९. करस (सरकः) १०. पलाश १६. रत्नावली १८. लाभलोल १९. नितान्तम् २०. भृतक २१. दीपकः

---

# मेलकस्य क्रीडा

- सा.विजयलेखाश्रीः
(शासनसम्राट्समुदायः)

शास्त्राध्ययनकाले ये पदार्था दुर्ज्ञेया अनुभूयन्ते, त एव पदार्था यदि दैनन्दिनेन जीवनेन सह तुल्यन्ते, तर्हि जीवनमपि रसदं भवति, पदार्थाश्चाऽपि सरलीभवन्ति। श्रीव्याख्याप्रज्ञप्तिसूत्रस्य द्वादशतमे शतके या प्ररूपणा कृता, तस्य सन्दर्भो महोपाध्याय-श्रीयशोविजयजीविरचिते श्रीअध्यात्म-मत-परीक्षा-ग्रन्थ उल्लिखितोऽस्ति। यद्यपि सकृद्दृष्टिपातेनेदं तत्त्वमसुगमं भासते, किन्तु मेलकस्य क्रीडया सह चेदिदं तत्त्वं सदृशीक्रियते, तर्हि सर्वमपि सुखंसुखेन ज्ञायते।

मेलक एका विशिष्टा दर्पणगृहस्य संरचना दृश्यते। तस्मिन् गृहे मनोरञ्जनाय विभिन्नेष्वादर्शेषु जनाः स्वप्रतिबिम्बं पश्यन्ति। कस्यचिदादर्शस्य सम्मुखं तिष्ठन् जनः स्वं स्थूलं पश्यति, कस्यचिच्च सम्मुखं क्षीणं पश्यति। कस्यचित्पुरत आगतो जनो लघुरपि दृश्यते, कस्यचिच्च पुरतो दीर्घोऽपि दृश्यते। कस्मिँश्चिदादर्शे जनस्य मस्तकं विशालं दृश्यते, उदरादीनि चाऽवयवानि ह्रस्वानि विलोक्यन्ते। पुनरन्यस्मिँश्च तद्विपरीतं विलोक्यते। किन्तु वस्तुतया जनो न स्थूलो वा क्षीणो वा भवति, परन्त्वादर्शो जनं विभिन्नाकारैः प्रतिबिम्बितं करोति।

एवमेवास्माकमात्माऽपि मुक्तात्मेवाऽनन्तज्ञान-दर्शन-चारित्रैः परिपूर्णोऽस्ति, तथाऽपि मोहोदयान्नानास्वरूपैः परिणतो भवति। तानि च मुख्यान्यष्टौ स्वरूपाणि श्रीव्याख्याप्रज्ञप्तिसूत्रे दर्शितानि सन्ति। तत्र श्रीगौतमगणधरः परमात्मानमपृच्छद् यथा – 'भगवन्! कतिविधा आत्मानः सन्ति?' चरमतीर्थपतिः श्रीमहावीरस्वामी प्रत्युवाच – 'गौतम! अष्टविधा आत्मानः सन्ति। तद्यथा – द्रव्यात्मा, कषायात्मा, योगात्मा, उपयोगात्मा, ज्ञानात्मा, दर्शनात्मा, चारित्रात्मा, वीर्यात्मा च।' इत्यादिः प्ररूपणा तस्मिन् सूत्रे कृता। एषामष्टप्रकाराणामात्मनां व्याख्याऽत्र संक्षेपेण निर्दिश्यते।

(१) **द्रव्यात्मा** – आत्मद्रव्यं त्रिकालवर्ति चैतन्यस्वरूपमस्ति, तद्युक्तो य आत्मा स द्रव्यात्मा भवति। सर्वेऽपि जीवा आत्मद्रव्ययुक्ता एव सन्ति, अथ सर्वे द्रव्यात्मानः सन्ति।

(२) **कषायात्मा** – क्रोधादिकषायैर्युक्त आत्मा कषायात्मा कथ्यते। कस्मिंश्चित् समयविशेषे यस्य जीवस्य कषायोदयो वर्तते, तत्समयावधिं यावत् स जीवः कषायात्मा गण्यते।

(३) **योगात्मा** – मनो-वाक्कायानां योगान् प्रवर्तयन्नात्मा योगात्मेति भण्यते । मुक्तात्मा-ऽयोगिकेवलिनौ परिवर्ज्य सर्वे संसारिण आत्मानो योगात्मानः ।

(४) **उपयोगात्मा** – उपयोगस्तु जीवस्य लक्षणम् । जीवः प्रतिसमयं ज्ञानस्य दर्शनस्य वा उपयोगवर्ती भवत्येव । अथ सर्वे जीवा उपयोगात्मानः ।

(५) **ज्ञानात्मा** – समयग्ज्ञानगुणयुक्त आत्मा ।

(६) **दर्शनात्मा** – पश्यत्तारूपदर्शनगुणेन सहित आत्मा ।

(७) **चारित्रात्मा** – हिंसादिप्रवृत्तीनां निवृत्तिरूपो यो विरतिपरिणामः, तद्युक्त आत्मा चारित्रात्मोच्यते ।

(८) **वीर्यात्मा** - क्रियाकरणोपयोगि यत् करणवीर्यं, तेन च संयुक्तो य आत्मा स वीर्यात्मा । इयं व्याख्या करणवीर्यमेव लक्ष्यीकृत्य कृता, न तु लब्धिवीर्यम् । अतः सिद्धात्मान्तरेण सर्वे संसारिणो जीवा वीर्यात्मानः ।

अनेन व्याख्याज्ञानेनेदं सुस्पष्टं भवति यत् प्रत्येकमात्मा द्रव्यात्मोपयोगात्मा दर्शनात्मा च भवत्येव, किन्तु कषायादिरूपात्मा भवत्यपि, न चाऽपि भवति । एवमेव प्रत्येकं प्रकारस्या-ऽन्यप्रकारेणाऽऽत्मना सह तुलनाकरणकाले कुत्रचित् समानता दृक्ष्यते, पुनः कस्मिँश्चित् स्थाने भजनाऽपि दृश्यते । यथा प्रत्येकं कषायात्मा द्रव्यात्मा भवत्येव, अत्र समानता लब्धा । किन्तु योगात्म-कषायात्मनोर्मध्य ईदृशी समानता नास्ति, यतः प्रत्येकं कषायात्मा योगात्मा तु भवत्येव किन्तु योगात्मा तु कषायात्मा भवेदपि, नाऽपि भवेद् – अतस्तत्र भजना प्राप्ता । अनया रीत्या यदा क्रमेणैकैकशो विचारणा क्रियते, तदाऽयं परिणामः लभ्यते । (अत्र स.= समानता, भ.= भजना)

| | द्रव्यात्मा | कषायात्मा | योगात्मा | उपयोगात्मा | ज्ञानात्मा | दर्शनात्मा | चारित्रात्मा | वीर्यात्मा |
|---|---|---|---|---|---|---|---|---|
| **द्रव्यात्मा** | - | भ. | भ | स. | भ | स. | भ | भ |
| **कषायात्मा** | स. | - | स. | स. | भ | स. | भ | स. |
| **योगात्मा** | स. | भ | - | स. | भ | स. | भ | स. |
| **उपयोगात्मा** | स. | भ | भ | - | भ | स. | भ | भ |
| **ज्ञानात्मा** | स. | भ | भ | स. | - | स. | भ | स. |
| **दर्शनात्मा** | स. | भ | भ | स. | भ | - | भ | भ |
| **चारित्रात्मा** | स. | भ | भ | स. | स | स. | - | स. |
| **वीर्यात्मा** | स. | भ | भ | स. | भ | स. | भ | - |

अनया प्ररूपणयेदं चिन्तनीयं भवति, यत् प्रतिसमयस्माकमात्मा कीदृशोऽस्ति ? दर्पणगृह अस्माकं शरीरस्याऽऽकृतिर्विभिन्नाकारैः प्रतिबिम्बिता भवति – केचिदाकारा अस्मभ्यं रोचन्ते, केचिच्च नैव। एवमेवाऽस्माकमात्माऽपि जगत्यस्मत्प्रवृत्त्यनुसारेण प्रतिबिम्बितो भवति। प्रतिदिनमिदं विचारणीयं यत्, किमहं चारित्रात्मोत कषायात्मा ? अद्य यदि जगति मम प्रतिबिम्बं कषायात्मरूपेण जातं तर्हि कियत्कालं यावदहं कषायात्माऽऽसम्, जगति ममैतादृशं प्रतिबिम्बं शोभते न वा ? यदि मह्यमेव ममैतादृक्प्रतिबिम्बं न रोचते, तर्ह्यन्येभ्यो जनेभ्यस्तत्कथं रोचेत ! एषां प्रश्नानामुत्तराण्यस्मान् जागरयन्ति, अशुभभावानां विसर्जनाय च सज्जीकुर्वन्ति।

********

# सन्मतितर्कः

## (तत्त्वबोधविधायिनीविवृति-न्यायसुधातात्पर्यविवरणाभ्यां विभूषितः)

## (प्रथमो भागः)

समत्वस्य विभावना समन्वयस्य च विचारणाऽनेकान्तवादस्य मूलम् । जैनदर्शन-सम्मतस्याऽस्याऽनेकान्तवादस्य प्ररूपकेषु शास्त्रेषु प्रधानीभूतमिदं **सन्मतितर्कप्रकरणम्** । सुगृहीतनामधेयाः श्वेताम्बरसङ्घललाटतिलकायमाना **दिवाकरबिरुदमण्डिताः** परमविद्वांसः **श्रीसिद्धसेनाचार्या** अस्य ग्रन्थरत्नस्य प्रणेतारः । अस्य ग्रन्थस्य तत्प्रणेतॄणां च जैनशासने-ऽतिविशिष्टं स्थानम् । किमधिकेन ? ग्रन्थस्याऽस्य विज्ञाताऽपि जैनसङ्घे दर्शनस्थविरात्मकेन गौरवार्हपदेनाऽलङ्क्रियते । जैनवाङ्मये तर्कशैल्याः प्रतिष्ठाऽनेनैव ग्रन्थेन जाता ।

षट्षष्ट्यधिकशतमितश्लोकपरिमाणात्मकस्याऽस्य प्रकरणस्योपरि न्यायपञ्चाननैः श्वेत-पटाचार्यैः **श्रीअभयदेवसूरिभिः** (ऐसवीये दशमे शतके लब्धजन्मभिः) **तत्त्वबोधविधायिन्य-**भिधाना विवृतिर्विरचिताऽस्ति । विशालदेहाया वृत्तेरस्याः परिमाणं सहस्राणां पञ्चविंशतिः श्लोकमितम् । अस्यां वृत्तौ रचयित्रा स्वसमयं यावत् सम्पूर्णे भारते वर्षे दार्शनिकक्षेत्रे चर्चितान् सर्वानपि वादान्, उद्धृतानि च सर्वाण्यपि मन्तव्यानि सुगभीरचर्चाया विषयीकृत्य तेषां खण्डन-मण्डनादि च विधायाऽनेकान्तवादस्य प्रतिष्ठा कृताऽस्ति । वृत्तौ तत्कर्तॄणां जैन-जैनेतर-दर्शनानां दार्शनिकग्रन्थराशेः तलस्पर्श्यवगाहनं प्रकटीभवति । समुद्रनिर्विशेषमहत्त्वेन वृत्तिरियं **वादमहार्णव** इत्यप्यभिधीयते ।

वृत्तेरस्या अध्ययनं नैव सुकरम् । विद्वांसोऽप्यत्र श्राम्यन्ति, किमुत विद्यार्थिनः ? अत्र खलु तावत्प्रमाणं गहनं तत्त्वं निहितमस्ति यदस्या वृत्तेः पारगमनमस्मादृशैस्तु चिन्तयितुमपि नैव शक्यते । अतः **शासनसम्राडि**तिबिरुदालङ्कृतैः दर्शनशास्त्रविशारदैः सर्वतन्त्रस्वतन्त्रैः परमगुरुभिः **श्रीविजयनेमिसूरीश्वरैः** (ऐसवीये विंशे शतके) तत्त्वबोधविधायिन्या विवृतेः तात्पर्यविवरणरूपा **न्यायसुधा**भिधाना वृत्तिर्विरचिताऽस्ति । अस्मिन् विवरणे विवृतिकारस्या-ऽऽशयस्य स्फोरणं, तत्त्वानां स्पष्टीकरणं च सम्यक्तया सञ्जातमस्ति । अस्मादृशानां मध्यमबुद्धीनां कृते इदं विवरणमतीवोपयोगीति महत्युपादेयताऽस्य विवरणस्य ।

अस्मिन् प्रकाशने **सन्मतितर्कप्रकरणस्य प्रथमकाण्डस्थायाः प्रथमाया गाथाया तत्त्वबोधविधायिनी** विवृतिरिदम्प्रथमतया **न्यायसुधाविवरण**सहिता प्रकाश्यते । न्यायसुधाया

हस्तादर्शः कियच्चित्कालात् पूर्वमेव लब्ध आसीत् । तदाधारेणेदं सम्पादनं विदुषा मुनिवरेण **श्रीत्रैलोक्यमण्डनविजयेन** महता परिश्रमेण कृतमस्ति । सम्पादने विस्तृतो विषयानुक्रमः परिशिष्टानि च योजितानि सन्ति । प्रायः पञ्चविभागात्मकं सम्पूर्णं प्रकाशनं भविष्यति । विमर्शयोग्या बहवो विषया प्रस्तावनायां चर्चिताः सन्ति ।

दार्शनिकक्षेत्रे इदमनन्यं प्रकरणमिति सर्वैर्जैन-जैनेतरविद्वन्मूर्धन्यैरवश्यमवलोकनीयम् ।

## ग्रन्थपरिचयः

| | |
|---|---|
| **ग्रन्थनाम** | **सन्मतितर्क-प्रकरणम्** |
| **मूलकर्ता** | **श्रीसिद्धसेन-दिवाकरसूरिः** |
| **तत्त्वबोधविधायिनी-विवृतिकर्ता** | **न्यायपञ्चानन-श्रीअभयदेवसूरिः** |
| **न्यायसुधा-तात्पर्यविवरणकर्ता** | **शासनसम्राजः श्रीविजयनेमिसूरीश्वराः** |
| **ग्रन्थ-सम्पादनम्** | **मुनिश्रीत्रैलोक्यमण्डनविजयः** |
| **प्रकाशकः** | **अभ्युदय-शिक्षणनिधिः, भावनगरम्** |
| **प्रकाशन-वर्षम्** | **वि.सं. २०७७, ई. २०२१** |
| **पृष्ठानि** | **A 4 – 58+702+48 = 808** |
| **मूल्यम्** | **₹ 1500/-** |
| **प्राप्तिस्थानानि** | **1. निखिल स्टोर्स**<br>पीरछल्ला शेरी, भावनगरम् 364001<br>9879222018<br>**2.भावेश एम. दोशी**<br>710, सुयोग्स गोदावरी कृपा,<br>वी.पी. क्रोस रोड<br>मुलुण्ड(पश्चिम) मुम्बई 400080,<br>9224103299 |

*******

# शाश्वती
## (काव्यसङ्ग्रहः)

साम्प्रतिकसंस्कृतकवीनां मूर्धाभिषिक्तानां लोकप्रियाणामन्यतमः छन्दो-गीत्युभयधारा-नदीष्णः प्रो. कामताप्रसादत्रिपाठी पीयूषोपाह्वः सम्प्रति काशते विकर्तनवत् काव्याकाशे । कवित्व-पाण्डित्य-सौजन्यत्रिवेणीपरिस्नातस्त्रिपाठी निसर्गादेव सिद्धकविः । न केवलं वृन्दारकवाचाऽपि तु हिन्दीभाषयाऽपि ललितललितं कवयन् पीयूषवर्यो लोकानुरागभाजनभूतश्चकास्ति । चिरं यावदसौ खैरागढस्थे इन्दिराकलासङ्गीतविश्वविद्यालये मध्यप्रदेशेऽध्याप्य तत्राऽकुण्ठसारस्वतयशश्चाऽधिगम्य पुनः प्रार्थितस्सन् स्वामिरामभद्राचार्य-विकलाङ्गविश्वविद्यालयं चित्रकूटस्थमुपाकरोत् ।

तस्य कविमतल्लजस्य काव्यसङ्कलना **शाश्वती**नाम्नीयं सम्प्रति प्रकाशिताऽस्ति । तत्र मङ्गलमालिका, राष्ट्रागः, संस्कृतसुरभिः, देवगवीगौरवं, युगानुबिम्बम्बं, ऋतुरङ्गः, कलाकल्लोलश्चेत्यभिधाः सप्तोन्मेषा विराजन्ते येषु सङ्कलिताः सन्ति प्रायशः सप्ततिमिताः काव्यबन्धाः स्वशीर्षकयुजः ।

संग्रहस्यास्य समधिकाः कविताः पूर्वं प्रकाशिताः संस्कृतपत्रपत्रिकासु यथावसरं, सुपरिचिताश्च । परन्तु सम्प्रति ता इदम्प्रथमतया ग्रन्थाकृतिं भजन्त इत्यभिमानविषयः।

प्रो. कामताप्रसादत्रिपाठिकवितासु विलसन्ति प्राक्तनमहाकवीनां काव्यादर्शाः । बाणभट्टस्य नवाभिप्रायः स्यात्, सुबन्धोः प्रत्यक्षरश्लेषप्रपञ्चो वा, बिल्हणस्य प्रौढिः स्यात्, नीलकण्ठदीक्षितस्य विन्यासविदग्धरीतिर्वा, राजशेखरस्य पाकाः स्युर्दण्डि-भामहयोर्वक्रोक्तिर्वा, समेषां काव्यवैशिष्ट्यानां प्रतिच्छाया पीयूषकाव्ये सङ्क्रान्ता परिलक्ष्यते ।

सर्वोत्तमं वैशिष्ट्यं पीयूषकाव्यस्य वर्तते – सौकुमार्यं, सारल्यं वा । हस्तिनखे भूभागे सत्वरं लुठन्ती वारिधारेव पुरस्सरति तस्य कविता । यथा वा,

चैत्रचन्द्रिका मन्दमेधयति माधुर्यं स्वच्छन्दम्,
किरति कौतुकोपेता रजनी सचेतनेष्वानन्दम् ।

सुरभिसङ्कुला, जयति मञ्जुला,
वेला वासन्ती! विपिने विहसन्ती !!

तदिदं स्थालीपुलाकन्यायानुगतं मूल्याङ्कनम् । निखिलमेव सङ्कलनं हृद्यानवद्यभावभरितं वर्तते । सहैव समेषामपि काव्यानां सरलया हिन्दीभाषया **अनुस्वनि**-नाम व्याख्याऽपि सङ्ग्रहेऽत्र कविवर्येण स्वयमेव समुपनिबद्धा वर्तते । अनया व्याख्यया काव्यानां रसास्वादः प्राथमिकाभ्यासिभिरपि कर्तुं शक्यते इति सङ्ग्राह्योऽयं काव्यग्रन्थः सर्वैरपि संस्कृतभाषाभिमानिभिः ।

********

## ग्रन्थपरिचयः


| | |
|---|---|
| **ग्रन्थनाम** | **शाश्वती** (काव्यसङ्ग्रहः) |
| | (**अनुस्वनि**-हिन्दी-टीका-संवलितः) |
| **रचयिता** | **प्रा. कामताप्रसाद-त्रिपाठी "पीयूषः"** |
| **प्रकाशकः** | **वाई. एस. तिवारी** |
| | **दुर्गा पब्लिकेशन्स** |
| | **ई-2/621, 4 ½ पुस्ता, सोनिया विहार** |
| | **दिल्ली 110090** |
| **प्रकाशनवर्षम्** | **ई. 2020** |
| **पृष्ठानि** | **232** |
| **मूल्यम्** | **₹ 350/-** |

## “पीयूष” - पृषन्ति कानिचन

### कला-सौरभम्

वन्द्यानन्दमरन्दबिन्दुनिभृतं,
चैतन्यनिष्यन्दितं,
मेधाव्यञ्जनमञ्जसा सुकृतिना-
मन्तर्दृगुन्मीलनम्।
सौन्दर्याम्बुजभावितं रसभृतं
सौजन्यसञ्जीवितं
विन्दन्तां मधुपोपमाः सहदया
भव्यं कला-सौरभम्।

---

### शाश्वती विश्वभूतये

उषेव मञ्जुहासिनी जगत्तमोविनाशिनी,
समत्वरश्मिकाशिनी मनुष्यताविकासिनी।
सरित् समङ्गशिल्पिनीव सिद्धिदा हि शाश्वती,
समानुभूतिरूर्जिता चकास्तु विश्वभूतये ॥

------------------

कथा

# संस्कारप्रपा

- पं.अक्षयरत्नविजयः गणी

## (१)

## निःस्पृहत्वं महासुखम्

जगति सर्वशरीरिणः सततं सुखशान्तिप्राप्त्यर्थं प्रयतन्ते । तत्कृते च जना धनाय स्वाभीष्टपूरणाय च यत्र तत्र परिभ्रमन्ति । परं तथाऽपि ते सुखं शान्तिञ्च न लभन्ते । कथं लभेरन्? नैव लभेरन् । तत्र विस्मयेनाऽप्यलम् । यत एतयोः सुखशान्त्यादयो विद्यन्त एव न ।

जगज्जनेष्वेतेषु वयमपि सम्मीलिता एव स्मः । अभीप्सितानां पूरणायाऽस्माभिरपि नैके प्रयत्नाः कृताः । किन्त्वस्मदभीष्टमपूर्णमेव स्थितम् । कदाचित् पूर्णं जातं तत्, तथाऽपि सुखं न लब्धमस्माभिः । वयं तु तदाऽपि सुखहीनाः शान्तिहीनाश्चैव स्थितवन्तः । यतोऽन्यतमा-ऽभिलाषाऽस्मदीया पूर्णीभवति तदा नूतना नैकेच्छा अस्मन्मनसि प्रादुर्भवन्ति । ततः किं कर्तव्यमित्युत्तरवेलायां सत्यां लघुसंवाद एकः स्मृतिपथं समवतरति –

भारतदेशीयपूर्वराष्ट्रपतेः अब्दुलकलामवर्यस्य प्रसङ्गोऽयम् । अब्दुलकलाम एकः सुज्ञ-श्चिन्तकोऽप्यासीत् । अन्यदा कलामेन केनचित् सन्यासिना सह मिलनस्याऽवसरो लब्धः । अन्यो-ऽन्यं विविधविषयो विमर्शः सञ्जातः । अनुविमर्शं कलामः सन्यासिनं पृष्टवान् - " महात्मन् ! अहमेकेनाऽनुत्तरप्रश्नेन चिराय मुह्यामि । चिन्तयामि यद् भवत्कृपया मम व्यामोहोऽयं दूरीभविष्यतीति ।"

सभ्यासिना पृष्टम् – " भोः! कीदृशो व्यामोहः पीडयति भवन्तम् ? "

"अहं सुखं वाञ्छामि, परं कथमपि न लब्धं तत्" – कलामेन स्वव्यामोहः प्रकटीकृतः ।

"भाग्यशालिन्! सुखाप्तेस्तात्त्विकमार्ग एक एव वर्तते ।" – सन्यासिना कथितम् ।

"को मार्गः पूज्यः?" - कलामेन त्वरया पृष्टम् ।

"सुखाप्त्यै मनोनीतपूर्त्यर्थं यत्नो न कार्यः, अपि तु निःस्पृहेनैव भाव्यम् । यस्य मनसि

निःस्पृहता वर्तते, तस्य चेतो नित्यं सुखमयं वर्तते । भवान् निःस्पृहो निराकाङ्क्षो भवतु । सुखं तु ध्रुवं प्रतीक्षते भवन्तम् ।” सन्न्यासिनाऽमृतमयं वचनमकथ्यत कलामं प्रति ।

कलामस्तु नितरामहोभावयुतोऽभूच्छ्रुत्वेमं हृदयस्पर्शिसद्बोधम् ।

किं न ज्ञायते यद् बोधोऽयं रम्यो वस्तुतोऽस्मज्जीवनेऽपि नूनं समाचर्य इति? अस्य प्रसङ्गस्य समापने मम चेतसा रारट्यते समर्थजैनशास्त्रकृन्महोपाध्याय-श्रीमद्यशोविजयगणिवर-रचितज्ञानसार-ग्रन्थगतश्लोकपङ्क्तिः - 'परस्पृहा महादुःखम्, निःस्पृहत्वं महासुखम्' इति ।

*******

## (२)
## गुणवान् राजकुमारः

गुर्जरभाषात्मकेऽन्यतमे सुवाक्ये शोभना वार्ता प्रतिपादिता यत् – 'मेलवजो नीतिथी, वापरजो रीतिथी अने आपजो प्रीतिथी' इति । अर्थाज्जीवने सर्वं नीत्यैव प्राप्तव्यम् । प्राप्तसामग्रीणां स्वसुखायोपयोगोऽपि मर्यादयैव कर्तव्यः, तासां (प्राप्तसामग्रीणां) चाऽन्येभ्यो दानमपि प्रीत्यैव कर्तव्यम् । अस्य सुवाक्यस्यैकांशोऽपि यस्य जीवने समवतरेत् तेन जनेन कीदृशमुत्तमं फलं लभ्येत तज्ज्ञातुं पठ्योऽयं शोभनः पुराणः प्रसङ्गः –

चीनदेशीयो राजकुमारस्थीङ्गो वयस्कः सञ्जातः । थीङ्गेन सह परिणयोत्सुकाभि-र्नैकाभी राजसुताभिरन्याभिश्च नगरबालाभिस्तत्करो याचितः । राजकुमारेणोक्तं – "केवलं बाह्यरूपं विलोक्य जीवनसङ्गिन्याश्रयनं नैव करिष्याम्यहम् । गुणाङ्काक्षोऽस्म्यहम् । परीक्षया-ऽहमनुभविष्यामि यत् परिणयोत्सुककन्यासु सद्गुणा विद्यन्ते न वा?"

राजकुमाराऽऽदेशेन परीक्षाऽऽयोजिता । विवाहोत्सुका नैकाः कन्याः षोडशशृङ्गारं कृत्वा समागताः । राजकुमारथीङ्गेन सर्वाभ्यः कन्याभ्यो बीजकं दत्तं घोषितञ्च – " भोः! शृणवन्तु । षड्भिर्मासैरस्माद् बीजाद् या कन्या मनोरमबालतरोः सर्जनं करिष्यति, परिणयार्थमहं तस्याश्रयनं करिष्यामि " । बीजं गृहीत्वा सर्वाः कन्याः स्वगृहं प्राप्तवत्यः । सर्वाभिश्च बीजस्य जलसेचनादि-परिचर्याऽपि प्रारब्धा ।

परिणयोत्सुककन्यास्वेकतमाऽऽसीत् कस्याश्चिन्निर्धनदास्याः पुत्र्यपि । तयाऽपि बीजं शोभनमुपचरितम् । तथाऽपि तस्याः सर्वेऽपि यत्ना विफलाः सञ्जाताः । तस्या बीजं कथमपि नैव स्फुटितवत् । तया नैके प्रयोगाः कृताः । तथाऽपि फलं नैव प्राप्तम् । अत्राऽन्तरे समयावधिः पूर्णतामधिगतः ।

पुनः सर्वकन्या राजप्रासादं प्राप्तवत्यः । स्वरूपवतीनां शृङ्गारयुतानां कुमारीणां हस्तेषु रम्यपुष्पसहितानि कुण्डकानि विद्यन्ते स्म । असौ दासीपुत्र्यपि राजगृहावसाने तिष्ठति स्म । तस्या बीजकुण्डकं सर्वथा पुष्परहितमासीत् ।

राजकुमारः प्रत्येकं कुमारिकायाः कुण्डकं निरीक्षमाणोऽग्रेऽवर्धत । सर्वा राजकुमार्यो निजमनसि चिन्तयन्ति स्म यद् – अधुना थीङ्गकुमारो मम पार्श्वमागमिष्यति विवाहार्थञ्च मम चयनं करिष्यतीति । परमहो चित्रम् !! राजपुत्रेण यस्याः कुण्डकं कुसुमविहीनमासीत् तस्या-श्चेटीसुतायाश्चयनं कृतम् । तत्कण्ठे च पुष्पमालाऽप्यारोपिता तेन । अनेन वृत्तेन राजमहालये परितः कोलाहलो जातः ।

यासां कुण्डकेषु बहूनि पुष्पाणि स्फुटान्यासंस्ता देवकुमारिकासदृशी राजकुमारीः श्रेष्ठिकन्याश्च परित्यज्य यस्याः कुण्डके पुष्पमेकमपि न स्फुटितं तस्याश्चेटीपुत्र्या एव चयनं कर्तव्यं स्यात्तदाऽस्माकमत्राऽऽगमनं केवलं नाट्यरूपमेव जातम् - इति सर्वकुमारीणामभिप्रायो वर्तते स्म । अत एव सर्वाभिः कुमारिकाभिः कोलाहलः क्रियते स्म ।

कोलाहलं शमयित्वा कुमारथीङ्गेन रहस्यमुद्घाटितम् – भोः कुमार्यः! मया यद्बीजकानि प्रदत्तानि युष्मभ्यं तानि दग्धबीजकान्यासन् । तेभ्यः कुसुमानि कथमपि न स्फुटेयुः । अतः पुष्पकुण्डकाभिर्युष्माभिः सर्वाभिरनीतेराचरणं कृतमिति स्पष्टं ज्ञायते । अनया पुष्पविहीनकुण्डिकया दासीसुतयैव नीतिः समाचरिता । अतो मत्परीक्षायां सा समुत्तीर्णा जाता । अथाऽहं निश्चयेन तस्यै मम राज्ञीपदं दास्यामि । यतोऽहं रूपग्राहको नाऽस्मि, अपि त्वस्मि गुणग्राहक एव । राजकुमारवचांसि श्रुत्वा चेटीपुत्र्या लोचने अश्रुपूर्णे जाते । तच्छीर्षञ्च कुमारस्य गुणग्राहकं हृदयं प्रत्यवनतं सञ्जातम् ।

आगम्यतां, वयमपि गुणिनो गुणग्राहकाश्च भवेम, जीवने चोत्तमानि फलानि प्राप्नुयाम ।

*****

## (३)

## स्वदोषविसर्जनम्

अद्यतनीये नरि वैशिष्ट्यं किमपि न भवेत्तथाऽपि साहङ्कारो वर्तते सः । 'अहं किञ्चिदपि नेति' सूत्रं तु विस्मृतमद्य । इतोऽद्य 'त्वहमेव सर्व' मिति सूत्रं प्रचलति । परं यो गर्वं करोति स न जानाति यदहङ्कारेण जीवनविकास आत्मविकासश्चाऽवरुध्यते । अद्यतनीयो ना प्रतिवर्षं दशाननदहनं करोति, प्रतिवर्षं गणेशविसर्जनमपि करोति, प्रतिवर्षञ्च दीपालिकावसरे सति गृहस्थितानां निस्सारपदार्थानां विसर्जनमपि करोति । परं स्वहृदयस्थितस्याऽहङ्कारस्य (उपलक्षणात् क्रोध-माया-लोभ-राग-द्वेषादीनां दोषाणां) विसर्जनं न करोति । वयमद्य दोषविसर्जनसङ्कल्पपूर्वं कथामिमां पठेम । यतो दोषविमुक्ता

एव वयं जीवनविकासमात्मविकासञ्च साधयितुं शक्ष्यामः ।

त्रिपिटकाचार्याख्यः कश्चित् कोविदः । तस्य चित्ते गर्वं विलसति स्म यन्मत्सदृशः कोऽपि विद्वान्न विद्यतेऽधुना । एकदा त्रिपिटकाचार्यो नृपसभां गत्वा राज्ञे विज्ञप्तवान् – " राजन्! इदानीन्तने समये भवतो राष्ट्रे मत्सदृशं पाण्डित्यं कस्याऽपि न विद्यते । अहमेव विद्वच्छिरोमणिरस्मि । अतो राजपण्डितपदं मह्यमेव देयम् । मत्सदृशमुचितपात्रं नैव प्राप्स्यते भवता " ।

राज्ञा ज्ञातं यद् – अस्य पण्डितस्य पार्श्वे ज्ञानमनल्पमस्तीति सत्यं, परं ज्ञानस्य परिपाको न जात इति दृश्यते । अतस्तेनोक्तं – " पण्डितवर्य ! वर्षं यावद् भवता पठितानां शास्त्राणां परिशीलनं क्रियतां, पश्चाच्चाऽत्राऽऽगन्तव्यम् " ।

त्रिपिटकाचार्यः श्रुत्वेदं मनसि क्रुद्धवान् । परं राजपण्डितपदाकाङ्क्षया मौनमेव चरितवान् । राजाज्ञामङ्गीकृत्य गतवान् सः । अनुवर्षं च पुनर्नृपसंसदं प्राप्तवान् ।

पुनस्त्रिपिटकाचार्येण भूपालेन सह सम्भाषणं कृतम । ततो नृपो ज्ञातवान् यत् पण्डितहृदयेऽहङ्कारस्त्वधुनाऽपि यथातथं तिष्ठति । अतो नरपतिनाऽऽदिष्टं – " पण्डितवर्य ! अद्यापि चिन्तनमावश्यकं ज्ञायते । पुनर्गन्तव्यं भवता । स्तोकमधिकं परिशीलनं करणीयम् " । कोविद-स्त्रिपिटकाचार्यः खिन्नो जातो नृपादेशं श्रुत्वा । परं तथाऽपि गतवान् सः । अथ पण्डितेन नदीतीरे साधनाऽऽरब्धा । एकदा साधनां कुर्वतस्त्रिपिटकाचार्यस्यात्मदृष्टिः स्फुटितवती । तेन स्वदोषान् प्रति दृष्टिपातः कृतः । स्वस्थिताः प्राज्या दोषास्तेन दृष्टाः ।

पण्डितवर्येणाथाऽऽत्मवेदित्वं प्राप्तम् । आत्मचिन्तनमनवरतमचलत् । दोषविसर्जनाय च तेन यत्नोऽप्यारब्धः । तेन राजपण्डितपदमोहोऽपि त्यक्तः । वर्षं पूर्णतामधिगतम् । परं त्रिपिटकाचार्यो राजसभायां न गतः । स्तोकदिनानि यावत्तु भूभुजा तस्य प्रतीक्षा कृता । पश्चान्नृपतिः स्वयं त्रिपिटकाचार्यसमीपं सरित्तीरं समागतः । नृपतिनाऽकथ्यत पण्डितः – " महानुभाव ! पुरमध्य आगम्यतां, राजपण्डितपदं च स्वीक्रियताम् । वयं सर्वे प्रतीक्षामहे भवन्तम् " । त्रिपिटकाचार्यः प्रत्युक्तवान् – " अधुनाऽहं राजपण्डितपदैषी नाऽस्मि । यतो येनाऽऽत्मबोधः प्राप्यते तस्य मानसे भौतिकसुखेच्छा न तिष्ठति " । तदनु मोहं सर्वथा परित्यज्य त्रिपिटकाचार्यो निरन्तरं साधनामग्नः सञ्जातः, आत्मकल्याणञ्च कृतवान् ।

वयमपि नित्यमवलोकयामो दोषान्, परन्त्वात्मनां परेषां वा ? इति प्रश्नो वर्तते । अत्राऽवधेयं, स्वदोषदर्शनेनैव जीवनोन्नतिर्भवति परदोषदर्शनेन तु जीवनावनतिर्भवतीति । आयायतां, सत्यमिदं विज्ञाय स्वदोषविसर्जनाय प्रयतामहे ।

******

## (४)

## कीदृशं लज्जास्थानम् ?

अस्मदीये जीवने लज्जाऽऽवश्यक्यस्ति । यतो लज्जाविहीनानां नृणां नास्ति दोषनिवृत्तिरित्यार्षवचनम् । यस्य जीवनं भवति ह्रीहीनं, तस्य जीवनं भवति श्रीहीनमपि । यद्यपि लज्जा पापकार्येषु स्यात्, न तु धर्मकार्येषु स्वजीवनावश्यककर्मसु वा । यदि धर्मकार्येषु स्वजीवनावश्यककार्येषु च जनस्त्रपामनुभवति, तर्हि तस्य सोऽनुभव एव लज्जास्पदं भवति ।

एकदा कस्मिंश्चिद् रेलस्थानके केनचिद् रेलयानेन कश्चिच्छ्रीमान् युवा समागतः । तस्य पार्श्वेऽत्यल्पः सम्भारो वर्तते स्म । उपकरणजातमिदं स स्वयं वोढुं क्षम आसीत् । तथाऽपि स कञ्चिच्चेटं मृगयितुमारब्धवान् । तत्राऽन्तरे कश्चिज्जनस्तत्समीपमागतवानुक्तवांश्च – " दीयतां, भवत उपकरणजातमहं गृह्णामि " । यूना स्वोपकरणानि तस्मै दत्तानि । पश्चादुभावपि चलितौ तौ । स्तोकसमयेन ताविष्टस्थानं प्राप्तवन्तौ । यूना स जनो भाटकार्थं पृष्टः । तदा स जन उक्तवान् – "मित्र! नाऽहं चेटः । ईश्वरचन्द्रविद्यासागरोऽहम् । भवतः सम्भारोऽत्यल्प आसीत् । अतस्तस्य ग्रहणे नाऽहमनुभूतवान् मनागपि कष्टम् " । श्रुत्वेदं युवा विस्मितवान् नितराम् ।

पश्चादीश्वरचन्द्रविद्यासागरेणोक्तं – " मित्र ! जानाम्यहं यत् सम्भारं ग्रहीतुं लज्जामनुभवति भवान् । परं त्रपेयं नूनं वृथा । लज्जा स्वकार्ये न कर्तव्या, अपि तु पापकार्ये कर्तव्या । यतः कुत्सिताचरणेन जीवनमपि भवति कुत्सितम् " ।

तदा तेन यूना नतशीर्षेणेश्वरचन्द्रप्रदत्तः सद्बोधोऽयं श्रुतोऽन्तःकरणे च सुविधं स्थापितः । वयमप्यस्मज्जीवने लज्जामेतादृशीमानयेम ययाऽस्मज्जीवनमपि भवेत् पापकार्येभ्यः पराङ्मुखम्, स्वकार्येषु धर्मकार्येषु च स्वाधीनं – सम्मुखम् । समासतः पापकार्यं-अकार्यं-कुत्सितकार्यमेव लज्जास्पदमिति विज्ञेयम् ।

*****

कथा

# सत्यं मित्रम्

- मुनिआत्मकीर्तिविजयः

"हे पितः! एकाकितया ग्रामे निवसनेन भवतो देहस्य कीदृशी स्थितिर्जाता ! ह्य आगतमात्रोऽहमेतदेव पश्यामि यत् – क्षणमात्रमपि भवतः कासो न विरमति, न च भवान् पौष्टिकमाहारमाहारयति, न चाऽत्राऽऽमयोचितं किमप्यौषधं सुलभम्। ईदृशि परिस्थितावत्र भवान् कथं निरामयो भविष्यति ? – इति सखेदं पुत्रो व्याधिग्रस्तं पितरमालपति स्म। अद्यैव भवन्तं मया सह नगरं प्रति नेष्यामि। पुत्रवध्वा पक्वमन्नं जेमित्वा भवत आरोग्यं सुष्ठु भविष्यत्येव। पुत्रस्याऽतीवोत्साहं प्रेमाग्रहं च निराकर्तुं पिता नैव शक्तः।

स ऐदम्प्राथम्येन ग्रामं त्यक्त्वा पुत्रेण सह नगरस्थं गृहमागच्छत्। राजभवनमिव विशालं गृहं, विस्तीर्णा अपवरकाः, अत्याधुनिक-भौतिकसामग्रीपरिपूर्णं सदनं, यत्किमपि कार्यार्थं तत्परः सेवकसमूहः – एतदासीत् पुत्रगृहस्य वैशिष्ट्यम्। तस्मादप्यधिकमनोहरं विस्तृतं च प्राङ्गणं तत्राऽऽसीद्, यन्मध्ये नैकशाखा-प्रशाखादिभिर्वृद्धिङ्गत एको महान् निम्बवृक्षो विलसति स्म।

पुत्रेण पितुः कृते एको विशालोऽपवरकः कल्पित आसीत्, तत्र च सर्वमपि सौविध्यं सिद्धमासीत्। किन्तु दिनार्धेनैव पित्रा तत्र जामिताऽनुभूता। स पुत्रवधूमुक्तवान् - " स्नुषे ! अस्मात् सर्वसौविध्ययुतादपवरकादपि मे तस्य निम्बवृक्षस्य छायाऽतीव रोचते। अतस्तत्रैवोपवेशनार्थं शयनार्थं च मम व्यवस्थां परिकल्पयतु"। साश्चर्यं सा प्रत्यवदत् - "किमर्थं वृक्षाधः ? गृहं तु पर्याप्ततया विशालं विस्तीर्णं च विद्यते। अथाऽपि भवान् निम्बवृक्षस्याऽध उपवेष्टुमिच्छति । यदि जनाः पश्येयुस्तदा ते किं चिन्तयेयुः ? " हसन्नेव पिताऽवदत् - "इदमस्मद्गृहम्। अत्र वयं यथा मोदं प्राप्नुयाम तथा वर्तितुं शक्नुमः। अत्र विषयेऽन्येषामभिप्रायस्य चिन्ता किमर्थं कर्तव्या ? "

पुत्रवधूरेतत् कर्तुं नोत्साहवत्यासीत् तथाऽपि पितुरादेशात् तया तत् स्वीकृतं, वृक्षस्याऽध एव एका खट्वा, एक आसन्दः, जलपानसामग्री – इत्यादिकं संस्थापितम् । तत आनन्दितः पिता प्रातःकालादारभ्य सायंकालपर्यन्तं तत्रैवोपविशति स्म विश्रामं चाऽपि करोति स्म । रात्रावपि कदाचन तत्रैव शेते स्म । एतेन तस्य स्वास्थ्यं क्रमशः समीचीनमभवत्, प्रसन्नता च वृद्धिङ्गता ।

अथैकदा पुत्रवधूः स्वपतिं कथितवती - "भवतः पिता कीदृशोऽस्ति ? सर्वामपि सुखसामग्रीं त्यक्त्वा तत्र निमबवृक्षतल एव वसति । एतद् दृष्ट्वा जनाश्चिन्तयेयुः – एतौ दम्पती स्वपितरं गृहाद् बहिर्न्यवासयद् - इति " ।

पतिः स्नेहेन तां बोधितवान् - " भोः ! नैषा भौतिकी सामग्री पितुः कृते सुखनिमित्तम् । किमेतादृशैः साधनैर्जीवने वर्तमानैकलता दूरीकर्तुं शक्यते वा ? एतद् विपरीततया वृक्षस्य सांनिध्ये तु जीवत्तत्त्वमनुभूयते । यत्र च जीवनस्याऽनुभूतिस्तत्र सुखसाधनानामावश्यकता नैव विद्यते । क्वैष प्राकृतिकः शीतलवायुः क्व च सा साधनैः कृता कृत्रिमशीतलता ? याथार्थ्येन तु प्रकृतिरेव मनुष्यस्य सन्मित्रम् । अपि च, पिता तत्र बहिरुपविश्य जनानां गमनागमनं पश्यति, तैः सह संलापं करोति, तेषां प्रवृत्तीर्विलोकयति, तेषां च सकाशात् किञ्चिन्नवीनं शृणोति – एतैः सर्वैः तस्य मनः प्रफुल्लितं भवति स्वास्थ्यं च निराकुलं भवति । अतो भवती सर्वामपि चिन्तां त्यक्त्वा तदुक्तमेव करोतु " ।

दिनेषु च व्यतीतेषु प्रतिवेशिनां गृहागमनं, तेन च वर्धमानां पितुः प्रसन्नतां स्वस्थतां चाऽपि विलोक्य तत् स्थानं पुत्रवध्वा अपि प्रियं जातम् । सन्मित्रस्याऽऽवश्यकता ननु कस्य नास्ति ?

******

कथा

# स्वार्थस्वरूपम्

- मुनिनिर्ग्रन्थचन्द्रविजयः
(डहेलावाला)

एको बालो ग्रामे वसति स्म। तस्म आम्रवृक्षः सुमधुराम्रफलानि चाऽत्यन्तं रोचन्ते स्म। प्रातः सन्ध्यायां च प्रतिदिनं वने गत्वा वृक्षे आरोहावरोहणादिक्रीडया क्रीडति स्म। तस्य वृक्षस्य विशेषताऽऽसीत् – " उपाये सति सर्वेषां चितरञ्जनं कर्त्तव्यम् "। इत्यतः सोऽपि बालक्रीडया मोमुद्यते स्म। क्रीडन् स यदा श्रान्तो भवति स्म तदा तस्यैव वृक्षस्य शीतच्छायायां स्वपिति स्म। तस्य वृक्षस्याऽनेन बालकेन सहाऽनन्यसदृशः सम्बन्ध आसीत्। एवं दिनाः प्रयान्ति स्म।

बालकोऽपि तरुणोऽभूत्। तस्य वनागमनमपि शनैः शनैरत्यल्पं जातम्। किञ्चित्कालानन्तरं तस्य तत्राऽऽगमनं सर्वथा स्थगितम्। वृक्षस्तं बालं स्मारं स्मारं प्रतिदिनं रोदिति स्म।

एकदा कदाचिदागच्छन्तं तं जनं निरीक्ष्य प्रमुदितमनाः स वृक्ष उवाच – भवान् कुत्र गतवान् ? भवद्विरहं कथं सह्यते मया ? पुरा तु भवान् क्षणमपि विलम्बं नैव करोति स्म। अधुना-ऽऽगच्छाऽऽवां क्रीडावो नानाक्रीडया।

ईषत्क्रोधमिश्रेणस्वरेण सोऽवदत् – " अधुनाऽहं क्रीडाप्रियो बालो न, किन्तु ध्येयानुरक्त-तरुणः। पठनाय समुत्सुकोऽपि धनाभावपीडया ग्रस्तस्तत्कर्तुं न प्रभवामि। भवान् कमपि सहायं कर्तुं शक्नोति न वा ? "

निःस्वार्थभावेन वृक्षेणाऽपि कथितं – " चिन्तां मा करोतु, भवान् मम पक्वानि फलानि नगरे विक्रीय यद्धनराशिः प्राप्यते तेन तव पठनादिकं कार्यं करोतु। अन्यदपि कार्यं भवेच्चेदेहं स्मरणीयो भवता "।

बालोऽपि तस्याऽऽम्रफलानि सङ्गृह्य नगरं प्रत्यगच्छत्, फलानि विक्रीय च पठने व्यापृतोऽभवत्। ततः स एकवारमपि वनं प्रति दृष्टिमपि न कृतवान् स्वकार्यमग्नश्च वृक्षं सर्वथा व्यस्मरदेव। वृक्षस्तु तं बालं स्मरन् दिनानगमयत्।

इतः प्रवृद्धः परिणतश्च स सर्वकारकार्यालये कार्यकरत्वेन नियुक्तो भाटकेन नगरे वसति स्म। अन्यदा समस्यापीडितः पुनरपि वृक्षसहायलिप्सुः प्रत्यागच्छद् वनं प्रति। वृक्षाय च स्वपरिस्थितिं निवेद्योक्तवान् – " दरिद्रोऽहं स्वीयं नव्यं गृहं रचयितुमिच्छामि। किन्त्वत्यल्प-जीवनकालेऽनल्पं धनं कथं साधनीयम्। भवान् किमपि साहाय्यं करिष्यति न वा ? "

वृक्षेणोक्तं – " चिन्तामपनयतु। मम बृहच्छाखाश्छित्त्वा नगरे नयतु। ताभिः शाखाभिः स्वीयं गृहं निर्मापयतु "।

युवकोऽपि तस्या शाखाः प्रच्छिद्य गतः पुनर्नैव प्रत्यागतः। स्थाणुभूतः स वृक्षः पुनरेकाकी जातः। मित्रवियोगेन दूनमनाः स क्षणमपि वर्षतुल्यममन्यत।

एकदा कश्चिद् वृद्धो वृक्षं प्रत्यागत्योक्तवान् – " महोदय! मां स्मरत्युत न ? "।

वृक्षो विचिन्त्याऽवदत् – " भवान् स एव यो बाल्यकाले मत्समीपे क्रीडनार्थमागच्छति स्म, जर्जरीभूतोऽहं भवतः सहायं कर्तुमसमर्थोऽद्य "।

"अद्याऽहं भवतः सहायं न, किन्तु भवन्तमपेक्षे। दुर्दैववशान्मम सम्पूर्णं गृहमग्नौ भस्मीभूतं, मत्पत्न्यपि च मयि विरक्ता। कृतघ्नोऽहं मम मुखमपि दर्शयितुमशक्तः। कृपया व्यतीतं सर्वं विस्मरतु। पूर्वमिवाऽऽवां क्रीडावः" – एवं वदन् स वृक्षमालिङ्गितवान्।

एतादृशमेवाऽस्माकं जीवनम्। मातापिता-गुर्वादिकृतानुपकारान् विस्मृतवन्तो वयं वृद्धत्वं प्राप्तास्तान् स्मरामः। किन्तु तावदतिविलम्बः सञ्जातः। परोकाराय सतां विभूतयः, अतस्तेऽस्माकं कदापि न विस्मरन्ति।

*******

कथा

# सुश्रावक आभड(आम्रभट्टः) श्रेष्ठी

- मुनिवचनयोगविजयः
(आ.श्रीओङ्कारसूरिसमुदायवर्ती)

नववर्षशतपूर्वं घटितमेतद् वृत्तमस्ति । अणहिल्लपुरपत्तने आभडनामा दरिद्रो वणिग् वसति स्म । तस्याऽऽर्थिकी परिस्थितिः समीचीना नाऽऽसीत् । स दुःखेन निर्वाहमकरोत् । एवमपि स धर्माराधनं नैव मुञ्चति स्म ।

अथैकदा गुरुभगवतां प्रवचने स परिग्रहपरिमाणाख्य-व्रतस्य महत्तामशृणोत् । ततः स गुरूणां पार्श्वे गत्वा न्यवेदयत् - " भगवन् ! अहं सुवर्णमुद्रादशकादधिकं परिग्रहं नैव करिष्यामीति तदर्थं व्रतं मे ददातु " । गुरुवरास्तु सामुद्रिकशास्त्रज्ञा बहुश्रुता गभीरप्रकृतयश्चाऽऽसन् । तैः कथितं - " भो ! भवता भाविकालमपेक्ष्य किञ्चिदधिकं परिमाणं कर्तव्यम् " । ततस्तेन किञ्चन वर्धितम् । ततो गुरुभिः - "इतोऽपि किञ्चिद् वर्धयतु" - इति स बहुशः प्रेरितः । प्रान्ते तेन लक्षत्रयसुवर्ण-मुद्राणां परिमाणं निश्चितम् ।

सत्सङ्कल्पोऽशुभं कर्म दौर्भाग्यं चाऽवश्यं निवारयति, शुभं कर्म सौभाग्यं च वर्धयति । अस्याऽपि च शुभभावेन गृहीतान्नियमादशुभकर्मण उदयो व्यपगत इव, सौभाग्यस्य शुभकर्मणश्च समुदयोऽभवत् । कदाचित् तस्य भार्या रुग्णत्वाच्छिशोः स्तन्यपानं कारयितुमक्षमा जाता । अतो बालस्य कृतेऽजाया दुग्धमावश्यकमभवत् । एतदर्थं श्रेष्ठी कस्माच्चिद् गोपादजामक्रीणात् । तां चाऽजां दुहन् श्रेष्ठ्युपालक्षयद् यदस्याः कण्ठे गोपेन यः पाषाणखण्ड बद्धोऽस्ति स वस्तुतस्तु बहुमूल्यं रत्नमिति । अतः स तद् रत्नं विक्रीतवान् । ततश्च लक्षं रूप्यकाणि तेन प्राप्तानि । एतेन मूलधनेन स व्यवसायमारब्धवान् । सौभाग्योदयाच्च तस्य वाणिज्यं बहुफलं जातम् । सततं तस्य धनवृद्धिर्जाता ।

एवंस्थितेऽपि लक्षत्रयसुवर्णमुद्रातो यदप्यधिकं प्राप्यते स्म तत् सर्वं सत्कार्येषु दाने च व्ययितवान् । एवं च तेन कोटिशो रूप्यकाणि सत्कार्येषु व्ययितानि । अतस्तस्य कीर्तिः सर्वत्र देशे प्रसृता । गूर्जरेश्वरो राजा कुमारपालोऽपि तस्य कीर्तिं श्रुत्वा चकितः प्रतिवर्षं कोटिमितं धनं तस्मै साधर्मिकाणां सहायार्थं प्रयच्छति स्म ।

एतत् सर्वं येषां प्रभावादाशिषश्च सञ्जातं ते तस्य श्रेष्ठिनो गुरव आसन् कलिकालसर्वज्ञा श्रीहेमचन्द्राचार्याः । आभडश्रेष्ठिना समग्रं जीवनं तेषामेव सान्निध्ये यापितं धर्मकार्याणि चाऽपि तेषां मार्गदर्शनेन कृतानि । प्रान्ते च व्रत-नियमादिभिः स्वजीवनं समुज्ज्वलं कृत्वा ससमाधि सद्गतिः साधिता ।

******

कथा

# यादृशी श्रद्धा – तादृशी सिद्धिः

- सा.हंसलेखाश्रीः

एकदा द्वौ सन्यासिनौ पुण्यवत्याः सत्या हझरत-राबियाया दर्शनायाऽऽगतौ । तामभिवन्द्य च तावुपविष्टौ । राबियासन्निधौ द्वे रोटिके आस्ताम् । अत्राऽन्तरे एको भिक्षुक आगतः । राबियया ते द्वे अपि रोटिके भिक्षुकाय दत्ते । इदं दृष्ट्वाऽऽश्चर्यं प्राप्तावपि सन्यासिनौ किमपि नोक्तवन्तौ । कियच्चिद्-वेलानन्तरमेका दासी रोटिकापूर्णं भाजनं गृहीत्वा राबिया समीपमागता । तयोक्तं – मम स्वामिन्या भवत्कृते इदं प्रेषितमस्ति । राबियया भाजनगता रोटिका गणिताः, ताश्चाऽष्टादशाऽऽसन्, अतस्तया दास्यै भाजनं प्रत्यर्प्योक्तं - इदं मत्कृते न स्यात्, काचित् क्षतिर्जाताऽस्ति – इति भासते ।

दासी भाजनं प्रतिगृह्य स्व-स्वामिनीसमीपं गतवती । तया सर्वं सविस्तरं कथितम् । स्वामिन्या द्वे रोटिके प्रक्षिप्य पुनर्दास्या सह तद् भाजनं प्रेषितम् । राबियया तत् दृष्ट्वा रोटिकानां गणना कृता । भाजने विंशती रोटिका आसन् । तया ताः स्वीकृताः सन्यासिनौ च भोजितौ । आश्चर्यं प्राप्ताभ्यां सन्यासिभ्यामस्य व्यतिकरस्य रहस्यं ज्ञापयितुं राबिया विज्ञप्ता ।

हझरत-राबियया प्रत्युत्तरितं – 'भवन्तौ द्वौ क्षुधितावास्तामित्यजानमहम् । मत्पार्श्वे द्वे एव रोटिके आस्ताम् । ताभ्यां कथमहं द्वावपि सन्यासिनौ संतोषयेयम् ? तावता स भिक्षुक आगतः । मया द्वे अपि रोटिके तस्मै दत्ते प्रार्थितश्च ईश्वरः – प्रभो भवतैवोद्घोषितमस्ति यदहं दानात् प्रति दशगुणितं प्रत्यर्पयामि । भवतस्तेनैव वाक्येन श्रद्धापूतया मया द्वे अपि रोटिके भिक्षुकाय प्रदत्ते । साम्प्रतं भवद्वाक्यं सफलीकर्तुं किं कर्तव्यमिति भवदधीनमस्ति । अथ सर्वसमर्थमीश्वरं प्रति कृतया श्रद्धया किं न भवेत् ? भवतोः पश्यतोरष्टादश रोटिका आगताः । मया चिन्तितं निश्चयेन प्रेषकस्यैव स्खलना जाताऽस्तीति । ईश्वरः सर्वज्ञोऽस्ति, स कथं प्रमाद्येत ? ततो मयाऽष्टादश रोटिकाः प्रति-प्रेषिताः । पुनर्विंशती रोटिका आगताः । मया विमृष्टमधुना सर्वं समीचीनमस्ति । नाऽन्यत् किमपि रहस्यमयं वर्तते, श्रद्धया जना ईश्वरप्राप्तिमपि कुर्वन्ति तत् किं क्षुत्तृप्तये रोटिका न प्राप्नुयुः ?

ईश्वरो न केवलं पाषाण-प्रतिमायां रुद्धोऽस्ति । परंतु सर्वेषां हृदयेषु स्थितोऽस्ति । भक्त-हृदये च सदा जागरितोऽस्ति । निष्क्रियमपि परमसक्रियं परमतत्त्वं श्रद्धा सम्मुखीकरोति ।

श्रद्धान्वितं प्रति माता-पितृ-बन्धु-सखीभूय स सहैव तिष्ठति । लोकेऽपि विश्रुतमस्ति –

देवे श्रद्धा यस्य यादृशी सिद्धिर्भवति तादृशी ।

*******

कथा

# भगवान् मयि स्निह्यति

- सा.तत्त्वनन्दिताश्रीः

विदेशस्येयं घटनाऽस्ति। एको धर्मगुरुस्तस्य चैकादशवर्षीयः पुत्र एकं सन्निश्चयं कृतवन्तौ यत् प्रत्येकं रविवासरे प्रातःकालीनप्रार्थनानन्तरं द्वाभ्यामपि कानचिद् बाइबल-पुस्तकानि गृहीत्वा ग्रामजनेभ्योऽर्पयितुं गन्तव्यमिति। ततः स्वनिश्चयानुसारं तौ बहुषु गृहेषु गत्वा बाइबलपुस्तकानि समर्पयन्ति स्म भगवतः सन्देशं च प्रसारयन्ति स्म।

अन्यदा प्रावृषि ऋतावेकस्मिन् रविवासरे मेघो धारासम्पातेन वर्षति स्म । अतो धर्मगुरुः स्वपुत्रमुक्तवान् - अद्य वृष्टिरखण्डधारया वर्षतीति बाइबल-पुस्तकानि दातुं न गन्तव्यम् - इति। तदा पुत्रोऽवदत् - पितः ! भगवतः कार्यं कुर्वाणानां न कुतोऽपि भयं भवेत्। भवान् तिष्ठतु, अहं तु गमिष्याम्येव। तन्मुखे विलसन्तीं दृढतां दृष्ट्वा पिता सस्मितं तन्मस्तके हस्तं प्रसार्य तस्मै गन्तुमनुमतिं प्रादात्।

स च बालकः स्यूतमध्ये बाइबलपुस्तकानि गृहीत्वा जलनिवारकवस्त्राणि च परिधाय धाराकारे वर्षति मेघे गृहान्निर्गतः। एकैकं गृहं गत्वा द्वारं खटखटायति स्म, द्वारे चोद्धटिते स पुस्तकमर्पयति स्म गृहस्थाय, कथयति स्म च यद् - " भगवान् भवति बहु स्निह्यति "। एतादृशं वचनं वदन् बाइबलपुस्तकं चाऽर्पयन् स बालः सर्वेषां देवदूत इव भासते स्म। एवमेव स घण्टाद्वयं यावद् बहूनि गृहाणि गत्वा पुस्तकानि समर्पितवान्। मेघस्य ताण्डवं तु बहुवृद्धिङ्गतमासीत्। अतः स स्वगृहं गन्तुमिच्छति स्म। किन्त्वितोऽपि पुस्तकमेक-मवशिष्टमासीत्। तेन वर्षति मेघे दृष्टिः प्रसारिता। दूरस्थितं गृहमेकं दृष्टिगोचरं जातम्। तेन चिन्तितं - " एकं पुस्तकं दत्त्वैव गमिष्यामि, भगवतः कार्यं पूर्णं करिष्यामि "।

स यथाकथमपि तद् दूरस्थितं गृहं प्राप्तः मुख्यद्वारं च खटखटायितवान्। किन्तु कोऽपि नोत्तरं प्रादान्न च द्वारमप्युद्घाटितवान्। अतः स पुनरपि द्वारं खटखटायितवान्। ततो पञ्चषैः क्षणैः काचन वृद्धाऽऽगत्य द्वारमुद्घाटितवती। तं च बालकं दृष्ट्वा विस्मिता सा पृष्टवती - " रे बालक ! एतादृशे वर्षति मेघे कथं किमर्थं चाऽत्राऽऽगतो भवान् ? "। तदा बालको बाइबलपुस्तकं स्यूता-न्निष्काश्य तस्यै समर्पितवान् कथितवांश्च यद् - " अहं भवत्यै सन्देशं दातुमागतोऽस्मि यद् भगवान् भवत्यां बहु स्निह्यति - इति, तथैव बाइबलपुस्तकमिदं भवत्यै उपहाररूपेण यच्छामि "।

तदा तया वृद्धया पृष्टं - " को भवान् ? केन च कारणेन भवान् मे भगवत्सन्देशं पुस्तकं च दातुं समागतः ? " तदा तेनोक्तं - " मातः ! मम पिता देवालये धर्मगुरुरस्ति। स वदति यद् - भगवन्तं यः कोऽपि

शुद्धहृदयेन प्रणिदधाति तस्मिन् भगवान् सर्वदा स्निह्यति । वयं सर्वेऽपि भगवत एव पुत्राः स्मः, अतो भगवान् अस्मासु सर्वेषु स्निह्यत्येव, फलतो भवत्यामपि स्निह्यत्येव । एनमेव सन्देशं बाइबलपुस्तकं च भवत्यै प्रदातुमहमागतोऽस्मि "।

एतच्छ्रुत्वा वृद्धाया मुखं स्मेरं जातम् । तया बालकहस्ताद् बाइबल-पुस्तकं गृहीतं तस्य च गृहान्तरागन्तुं कथितम् । तदा, " मे पिता चिन्तां करिष्यति " - इत्युक्त्वा स बालको निर्गतः । निर्गच्छंश्च स वृद्धाभिमुखं दृष्ट्वाऽहसत्, ततश्च प्रसन्ना वृद्धाऽपि तन्मुखं दृष्ट्वा हसितवती । स्वकार्यसमाप्त्याऽतीव प्रसन्नो बालको गृहं प्राप्तः ।

घटनाया अस्या एकं सप्ताहं व्यतीतम् । पुना रविवासरः समागतः । प्रातःकालीन-प्रार्थनानन्तरं धर्मगुरुः स्वीयं प्रवचनं कृतवान् । ततः स उद्घोषितवान् - " भगवतः करुणाऽस्माभि-र्जीवनेऽनुभूतैव स्यात् कदाचिदपि । तत्र च यदि कश्चन स्वीयमनुभवं कथयितुमिच्छेत् तर्ह्यग्रे आगत्य सर्वेषां पुरतो वर्णयतु "। एतत् कथनानन्तरं देवालये नीरवता व्याप्ता ।

कतिपयक्षणानन्तरं बाइबल-पुस्तकं हस्तेन गृहीत्वैका वृद्धा मन्दं मन्दं मञ्चे समागता । आगत्य च तया स्वानुभवकथनमारब्धम् - " अहमद्य प्रथमवारमेव देवालयमागता । कोऽप्यत्र मां नैव जानाति । मम गृहमितो बहुदूरे वर्तते । वर्षद्वयात् पूर्वमेव मम भर्ता मरणं प्राप्तवान् । तदनन्तरमह-मेकाकिन्येव जीवनं यापयामि । न कोऽपि स्नेही स्वजनो वा मम विद्यते । अथ सप्ताहात् पूर्वमिह बह्वी वृष्टिः सञ्जाता । अहमेकला भर्तारं स्मृत्वा रोदितवती । तत्स्मरणेन मम मनसि भृशं निराशा व्याप्ता । ततोऽहमात्मघातस्य निर्णयं कृतवती । मया छदिषि रज्जुर्बद्धा । ततो यावदहं तां कण्ठे रोपयितुमुद्यता जाता तावदेव मम गृहद्वारं खटखटायितं केनचित् । मम प्रतिभातं यन्मे भ्रमोऽयमिति, यतो वर्षद्वयान्न कोऽपि कदाचिदपि मम गृहमागतवान् । अतोऽहं पुनरपि रज्जुं कण्ठे रोपयितुमुद्यता तावता पुनरपि द्वारं खटखटायितम् । अतोऽहं रज्जुं मुक्त्वा यावद् द्वारमुद्घाटितवती तावता द्वारि कश्चन सुरूपो बालको दृष्टः । तस्य मुखे निर्मलं स्मितं विलसदासीत् । तादृङ् निर्मलं स्मितं मया कदाऽपि कस्याऽपि मुखे नैव विलोकितमासीत् । स बालकोऽकथयत् - भगवान् भवत्यां बहु स्निह्यति । ततो स मे बाइबल-पुस्तकमेकमार्पयत् । बालकस्तु पूर्णतयाऽऽर्द्रो जात आसीत् किन्तु पुस्तकं तु सर्वथाऽऽर्द्रं नाऽऽसीत् । तस्य बालकस्य हास्यात् मधुरवचनाच्च ममाऽऽत्मघातस्य निर्णयो विलीनो जातः । तद्धास्यं तच्च वचनं मे नूतनामेकां दृष्टिमदात् । तत आरभ्य बाइबल-पुस्तकमेव पठामि स्वात्मचिन्तनं च करोमि । तेन च मम जीवने स्वभावे वर्तने च रूपान्तर-मारब्धमस्ति । मम प्रतिक्षणं प्रतिभाति यद् भगवान् मयि बहु स्निह्यति । मम जीवनमधुना सुख-स्याऽऽनन्दस्य च प्रकाशेन प्रकाशमानमस्ति । अहं शेषं जीवनं जनसेवया व्यतीतं कर्तुमिच्छामि ।

किमस्माभिरपि कदाऽप्यनुभूतं यद् - भगवान् मयि बहु स्निह्यति ??

*******

कथा

# ध्येयात् कियद्दूरम्

- प्रा.तन्मयभाई शाहः

विदेशादेकं यानपात्रं समुद्रमार्गेण मुम्बईमहानगरमागन्तुं निर्गतम् । यानपात्रस्य सूत्रधारोऽतीव निपुण आसीत् । स निर्गमनात् पूर्वमेव सर्वान् कर्मकरान् सम्मेल्य यथार्हं कार्यविभाजनमकरोत्, सर्वांश्च सूचनामपि दत्तवान् यद् – न केनाऽप्यन्येषां कार्येषु चञ्चुपातोऽन्तरायो वा कर्तव्यः ।

स एकं कर्मकरं दिशादर्शकयन्त्रस्य निरीक्षणार्थं नियोजितवान् सहैव सूचितवानपि यत् – "भवता सततं दिशादर्शकयन्त्रे दृष्टिं निधाय स्थातव्यम् । यदि यन्त्रस्य सूची स्वल्पमपि स्वस्थानाच्चलेत् तदा तत्क्षणमेव निर्यामकाय ज्ञापनीयम्" । तेनाऽपि तत्स्वीकृत्य निरीक्षणमारब्धम् ।

अथ च पोतं सामान्यगत्या मुम्बईमहानगरं प्रति चलदासीत् । एतावता नाविकस्य कयाचित् क्षत्या पोतस्य मार्गदिक् स्वल्पं परावृत्ता । एतच्च न केनाऽपि लक्षितम् । दिग्दर्शकयन्त्रनिरीक्षकेण कर्मकरेण तु लक्षितं यत् - सूचिः स्वल्पं स्वस्थानाच्चलिता । परमेतादृशेनाऽत्यल्पपरावर्तनेन का वा हानिर्भविता ? इति विचिन्त्य स निर्यामकस्य तत्परावर्तनविषयं नैव न्यवेदयत् । प्रवहणं तु तयैव परावृत्तया दिशाऽग्रे चलद् यदा भारतीयसमुद्रतटं प्राप्तं तदा निर्यामक आश्चर्याघाताभ्यां स्तब्धोऽभवत्, यतस्तीरं तु भारतस्यैवाऽऽसीत् किन्तु मुम्बईमहानगरात् पञ्चशतमैल्-दूरम् ।

एतच्च कथं सञ्जातम् ? - इति सर्वत्र निरीक्षमाणः स यदा दिग्दर्शकयन्त्रं विलोकितवांस्तदा तेन लक्षितं यदस्य सूचिस्तु स्वल्पं स्वस्थानाच्चलितेति । स यन्त्र-निरीक्षकायाऽकुप्यद् यत् - " किमर्थं भवता सूच्याः स्थानपरावर्तनमेतन्निर्यामकाय निवेदितम् ?" तेन कथितं - "महोदय ! एतत्तु सर्वथा नगण्यं सूचिपरावर्तनं, तेन का वा हानिः स्यात् ? - इति विचिन्त्य मया कस्याऽपि तन्नैव कथितम्" । सूत्रधारोऽवदत् - "भोः! चतुर ! अस्य यन्त्रस्य सूच्याः स्वल्पचलनेनाऽपि यात्रायामेतस्यां वयं लक्ष्यात् पञ्चशतमैल्-मितं दूरं प्राप्तास्तर्हि यदि दीर्घा यात्राऽभविष्यत् तदा वयं पञ्चसहस्रमैल्-मितमेव दूरं प्राप्ताः स्याम । ध्येयात् स्वल्पमपि परावर्तनं हानये एव भवेत् । इदानीमप्यस्माकं समयस्य, इन्धनस्य, धनस्य, संसाधनस्येति सर्वविधा हानिर्जातैव खलु ! " ।

वयमपि जीवनारम्भे किमपि लक्ष्यं निश्चित्य तल्लब्धुं प्रयत्नान् कुर्मः, तदर्थमावश्यकान् नियमान् पालयामः, किन्तु यदा कदाऽपि प्रमादवशगा भूत्वा नियमेषु कांश्चदपवादानपि कल्पयामः कदाचित् । अथो विचारयामो वयं यद् - एतावद्भिर्लघ्वपवादैः किं वा भविष्यति ? किन्तु न विचारयामः कदाप्येतद् यद् – गच्छता कालेन एते लघ्वपवादा अप्यस्मान् ध्येयादतिदूरं नेष्यन्ति, कदाचिच्च ध्येयच्युतानप्यस्मान् करिष्यन्तीति ।

******

# शब्दपूरणी

- मुनिनिर्ग्रन्थचन्द्रविजयः
(डहेलावाला)




## ★ वामतः दक्षिणम्

२. विन्ध्याचलः विसर्गरहितः ५

६. स्त्रीणां कटिबन्धः, जिह्वा, रज्जुर्वा स्त्रियाम्। ३

७. नर्तकी, स्वेच्छाचारिणी स्त्री वा। ३

८. द्यूतक्रीडायां किं प्रक्षिप्यते ? ३

१०. श्रेष्ठः, सर्वोत्तमः, अनुस्वाररहितः। ३

१२. काष्ठमयम् अण्डाकारं पात्रम्, पाण्डवानां गुरुं स्मारयति विसर्गरहितः २

१३. शर्करया युक्तं दधि, शिखरिणी वा। ३

१४. स्पर्शेन शीतः, वर्णेन श्वेतश्च, तुषारो वा। २

१५. स्वादरहितः, विसर्गरहितः, ह्रस्वादिश्च। ३

१७. लघुकाष्ठमय दण्डः, नेत्रे अञ्जयितुमत्युपयोगी। ३

२२. उन्मत्तशिवस्य नृत्यम्। अनुस्वाररहितम्। ३

२३. अत्यधिकलोभी। विसर्गरहितः। ३

२४. क्रीडनकवद् हस्तगृहीतम् अरविन्दम्, कृत्रिमं कुशेशयं वा। ५

## ★ उपरिष्टात् अधः

१. अन्तःपुरे नियुक्ता दासी, पाञ्चाली वा। ३

२. लोकनाथः, राजा वा विसर्गरहितः। ४

३. मृगजालिका, नागरिका इव भाति। ३

४. भिन्नभिन्नामाकृतिं बिभर्ति, चन्द्रमा वा। विसर्गरहितः। ४

५. विकृतिः, परिवर्तनं वा। ३

८. विख्यातव्याकरणकर्ता। विसर्गरहितः। ३

९. यस्मिन् मद्यं पीयते, प्रत्यावृत्तम्। ३

१०. पर्णम्, अनुस्वाररहितम्। ३

११. जलस्य वायुस्वरूपम्, अवश्यायः वा। ३

१६. काष्ठाभरणं, माला वा। ४

१८. अधिकाधिकफललिप्सुः, लकारत्रययुतः। विसर्गरहितः। ४

१९. अत्यधिकं, निश्चयो वा। अव्ययम्। ३

२०. वेतनेन नियुक्तः कर्मकरः, विसर्गरहितः। ३

२१. तमः नाशयति, कज्जलध्वजः वा। ३

(अस्या उत्तराण्यस्यामेव शाखायामन्यत्र प्रदत्तानि सन्ति।)

********

# मर्म नर्म

- कल्याणकीर्तिविजयः

**पतिः** अहमा द्वाविंशतेर्वर्षेभ्यः पश्यन्नस्मि यद् मम प्रत्येकं वचनं भवती निराकरोतीति !

**पत्नी** नहि नहि, त्रयोविंशतिर्वर्षाणि जातानि !!

*****

**चिकित्सकः** भवतः कुत्र पीडा जायते ?

**रोगी** यदि भवान् शुल्कं न्यूनीकरोतु तदा कथयामि !

**चिकित्सकः** यदि शुल्कं न न्यूनीकुर्यां तदा... ?

**रोगी** तर्हि स्वयमेव अन्वेषयतु !!

*****

(शताधिकवर्षायुष्कं वृद्धजनं कश्चन पत्रकारोऽपृच्छत्)

**पत्रकारः** भवतो दीर्घायुषो रहस्यं किम् ?

**वृद्धजनः** न केनाऽपि सह विवादस्तर्को वा कर्तव्यः, वदतु नाम यः कोऽपि किमपि नाम !

**पत्रकारः** अहं न मन्ये तत् । दीर्घायुषस्तु सम्यङ् व्यायामः, आहारो, निद्रा – इत्यादीनि कारणानि भवितुमर्हन्ति खलु !

**वृद्धजनः** तर्हि, एवमपि स्यान्नु !! (तर्को विवादो वा सर्वथा नैव कर्तव्यः खलु !)

*****

बुद्धिधनाय वैद्येन सूचितं यद् ग्रीष्मर्तौ वारद्वयं स्नानं कर्तव्यमिति ।

भवतु....

ततः बुद्धिधनो ग्रीष्मारम्भे एकवारं....तथा....ग्रीष्मान्ते एकवारम्....इति....वारद्वयं स्नातः !!

*****

**कर्मकरः** स्वामिन् ! भवतः शालेयः सुहृत् कश्चन भवन्तं मिलितुं समागतोऽस्ति ।

**श्रेष्ठी** भवता कथं ज्ञातं यत् स मे शालेयः सुहृदस्तीति ?

**कर्मकरः** तेन पृष्टं यत् - गर्दभो गृहेऽस्ति वा ?

# मर्म नर्म

**सा.ज्ञानश्रद्धाश्रीः**

(आ.ओङ्कारसूरिसमुदायवर्तिनी)

**पत्नी** (प्रसाधनानन्तरं) अहं कीदृशी दृश्ये ?

**पतिः** भवती जम्मु-कश्मीरवद् दृश्यते !

**पत्नी** तत् कथम् ?

**पतिः** भवत्या मुखे सुन्दरताऽऽतङ्कयोः समन्वयो दृश्यतेऽतः !!

*****

**पत्नी** भवान् मयि कियत् प्रेम करोति ?

**पतिः** तत्र किं वक्तव्यं प्रिये ! ? भवत्या खादितं हलाहलमपि खादिष्यामि ! अनुभवं करोतु..... !

*****

**न्यायाधीशः** गृहस्वामिनि पश्यत्यपि भवता कथं चौर्यं कृतम् ?

**चौरः** महोदय ! भवतो वृत्तिरतीव प्रशस्ताऽस्ति, वेतनमपि पर्याप्तं प्राप्यते, तर्हि किमर्थमेतद् ज्ञातुमिच्छति भवान् ?

*****

**पत्नी** भवानतीव मुग्धोऽस्ति । शीघ्रमेव केनाऽपि वञ्च्यते ।

**पतिः** आम्...सत्यम्...भवतः पित्रैवैदम्प्राथम्येन वञ्चितः !!

*****

**पत्नी** (पतिं) अरे ! कुत्र मृतो रे ?

**पतिः** एषोऽहमागतः !!

(एतदासीदतिशीघ्रतया प्राप्तस्य पुनर्जन्मन उदाहरणम्)

*****

प्राकृतविभागः

# चन्द्रलेखाचरित्रम्

(सम्यक्त्वसप्ततिकाग्रन्थान्तर्गतम्)

हियायाणंदणचंदणफुल्लिरफुल्लेहिँ वासिअदियंतो ।
भारहसिरीइ सेहरसारिच्छो अत्थि मलयगिरी ।।१।।

तरुवरकयसिरछत्तो निब्भरचामरसएहिं सोहिल्लो ।
इयरसिहरीसु जो उण रायसिरिं पयडए सययं ।।२।।

तस्स सिहरिस्स सिहरे वडतरुणो उवरि कीरवरमिहुणं ।
नेहपरं परिवसइ तमालदलकोमलच्छायं ।।३।।

केणवि खयरेण कुऊहलेण तरलियमणेण तं मिहुणं ।
दट्ठूणं संगहियं चंचुओ नडियअरुणपहं ।।४।।

नेउं तं नियगेहे मणिपंजरसंठियं पढावेइ ।
सयलकलाओ छद्दंसणाण तत्ताणि य जहिच्छं ।।५।।

निच्चं खयरो मिहुणं तं सह गहिऊण भमइ भुवणंमि ।
तव्विरहे उण सव्वं जयं पि सुन्नं व मन्नेइ ।।६।।

अह तं चारणमुणिणा पडिबोहिय खेयराउ सुयमिहुणं ।
सयलकलानिलयं पि हु मोयवियं मलयगिरिसिहरे ।।७।।

खेयरपरियरणाए विन्नायसमत्थसत्थपरमत्थं ।
तम्मिहुणं सच्छंदं विलसइ विविहेहिं भोगेहिं ।।८।।

ताणं कमेण जाओ तप्पडिरूवो तणुब्भवो कीरो ।
सो तेहिं सिक्खविओ कलाकलायं समग्गंपि ।।९।।

अन्नुन्ननेहनिरयस्स तस्स मिहुणस्स कह वि दिव्ववसा ।
जाओ अईव कलहो धिरत्थु चित्ताणि कामीणं ।।१०।।

तरसा सुएण तत्तो अवरा तारुण्णपुण्णसव्वंगी ।
संगहिया वरकीरी निब्भरपिम्मेण परिकलिया ।।११।।

# चन्द्रलेखाचरित्रम्

(संस्कृतच्छाया)

- आचार्या विजयकस्तूरसूरयः

हृदयानन्दनचन्दनफुल्लितपुष्पैर्वासितदिगन्तः ।
भारतश्रियाः शेखरसदृशोऽस्ति मलयगिरिः ॥१॥
तरुवरकृतशिरश्छत्रो निर्भरचामरशतैः शोभितः ।
इतरशिखरिषु यः पुना, राजश्रियं प्रकटयति सततम् ॥२॥
तस्य शिखरिणः शिखरे, वटतरोरुपरि कीरवरमिथुनम् ।
स्नेहपरं परिवसति तमालदलकोमलच्छायम् ॥३॥
केनाऽपि खचरेण कुतूहलेन तरलितमनसा तन्मिथुनम् ।
दृष्ट्वा सङ्गृहीतं चञ्चुतोऽधरितारुणप्रभम् ॥४॥
नीत्वा तन्निजगेहे मणिपञ्जरसंस्थितं पाठयति ।
सकलकलाः षड्दर्शनानां तत्त्वानि च यथेच्छम् ॥५॥
नित्यं खचरो मिथुनं तत् सह गृहीत्वा भ्रमति भुवने ।
तद्विरहे पुनः सर्वं जगदपि शून्यमिव मन्यते ॥६॥
अथ तच्चारणमुनिना प्रतिबोध्य खेचराच्छुकमिथुनम् ।
सकलकलानिपुणमपि खलु मोचितं मलयगिरिशिखरे ॥७॥
खेचरपरिचरणया विज्ञातसमस्तशास्त्रपरमार्थम् ।
तन्मिथुनं स्वच्छन्दं विलसति विविधैर्भोगैः ॥८॥
तयोः क्रमेण जातस्तत्प्रतिरूपस्तनूद्भवः कीरः ।
स ताभ्यां शिक्षितश्च कलाकलापं समग्रमपि ॥९॥
अन्योऽन्यस्नेहनिरतस्य तस्य मिथुनस्य कथमपि दैववशात् ।
जातोऽतीव कलहो धिगस्तु चित्तानि कामिनाम् ॥१०॥
तरसा शुकेन ततोऽपराः तारुण्यपूर्णसर्वाङ्गी ।
सङ्गृहीता वरकीरी निर्भरप्रेम्णा परिकलिता ॥११॥

कीरी तओ वराई तं मन्नावेइ चाडुवयणेहिं ।
तह वि न मन्नइ कीरो पावो इयरीइ गहियमणो ॥१२॥

दट्ठुं सा नियदइयं कट्ठुव्व पणट्ठपिम्मरसभारं ।
जंपइ अप्पसु खिण्णं मह पुत्तं गुत्तसुपवित्तं ॥१३॥

भणियं च - इत्थीण ताव पढमं पिओ पिओ होइ सव्वभंगीहिं ।
तव्विरहियाण पुत्तो नियमणआसासओ होइ ॥१४॥

अहयं पुण निव्विण्णा दुरंतसंसारदुक्खवासाओ ।
गंतुं कंमि वि तित्थे अप्पाणं साहइस्सामि ॥१५॥

एसो पुत्तो मह पाससंठिओ धम्मसलिलसेएण ।
मोहं हरेइ संलेहणाइ विहियाइ जह तित्थे ॥१६॥

धम्मज्झाणं तह पवहणं च निज्जामएण परिचत्तं ।
अवसाणसमयजलणिहिपरपारं नेव पावेइ ॥१७॥

कीरोऽवि हु तव्वयणं सुणित्तु जरज्जरुव्व कंपंतो ।
पभणइ - मग्गंती मह तणयं सयखंडयं न गया ॥१८॥

पुत्तो पिउणो आभव्वमेव वरखित्तखित्तबीयं व ।
सा वि भणइ - माऊए न तं विणा जं भवे तणओ ॥१९॥

यतः - उपाध्याया दशाऽऽचार्य, आचार्याणां शतं पिता ।
सहस्रं तु पितुर्माता, गौरवेणाऽतिरिच्यते ॥२०॥

एवं बहुप्पयारं विवयंतं पुत्तसंजुयं मिहुणं ।
निच्छयकए पुरीए कंचीइ गयं नहपहंमि ॥२१॥

तत्थऽत्थि वेरिलच्छिवेणीआगरिसणिक्कदुल्ललिओ ।
दुल्ललिओ नरनाहो तस्स सहोवरि गयं मिहुणं ॥२२॥

खेयरसंसग्गेणं विगयभयं तं नहंमि ठाऊणं ।
कीरो वण्णइ पढमं नरनाहं निययबुद्धीए ॥२३॥

भूमीसरो स नंदउ जस्स सरस्सइरसं निएऊणं ।
पायालतलं गुविलं निलीय चिट्ठेइऽहो अमियं ॥२४॥

कीरी ततो वराकी तं मानयति चाटुभिर्वचनैः।
तथाऽपि न मन्यते कीरः पाप इतरया गृहीतमनाः ॥ १२॥

दृष्ट्वा सा निजदयितं काष्ठमिव प्रणष्टप्रेमरसभारम्।
जल्पति अर्पय खिन्नं मम पुत्रं गुप्तसुपवित्रम् ॥१३॥

भणितञ्च - स्त्रीणां तावत् प्रथमं प्रियः प्रियो भवति सर्वभङ्गीभिः।
तद्विरहितानां पुत्रो निजमनआश्वासको भवति ॥१४॥

अथ यत् अहं पुनर्निर्विण्णा दुरन्तसंसारदुःखवासात्।
गत्वा कस्मिन्नपि तीर्थे आत्मानं साधयिष्यामि ॥१५॥

एष पुत्रो मम पार्श्वे संस्थितो धर्मसलिलसेकेन।
मोहं हरति संलेखनया विहितया यथा तीर्थे ॥१६॥

धर्मध्यानं तथा प्रवहणं च निर्यामकेन परित्यक्तम्।
अवसानसमयजलनिधिपरपारं नैव प्राप्नोति ॥१७॥

कीरोऽपि हु तद्वचनं श्रुत्वा जराजर्जर इव कम्पमानः।
प्रभणति - मार्गयन्ती मम तनयं शतखण्डकं न गता ॥१८॥

पुत्रः पितुराभवमेव वरक्षेत्रक्षिप्तबीजमिव।
साऽपि भणति मातुः न तद्विना यद् भवेत्तनयः ॥१९॥

यतः - उपाध्याया दशाऽऽचार्य, आचार्याणां शतं पिता।
सहस्रं तु पितुर्माता, गौरवेणाऽतिरिच्यते ॥२०॥

एवं बहुप्रकारं विवदमानं पुत्रसंयुक्तं तन्मिथुनम्।
निश्चयकृते पुर्यां काञ्च्यां गतं नभःपथेन ॥२१॥

तत्राऽस्ति वैरिलक्ष्मीवेण्याकर्षणैकदुर्ललितः।
दुर्ललितो नरनाथस्तस्यः सभोपरि गतं मिथुनम् ॥२२॥

खेचरसङ्गेन विगतभयं तन्नभसि स्थित्वा।
कीरो वर्णयति प्रथमं नरनाथं निजकबुद्ध्या ॥२३॥

भूमीश्वरः स नन्दतु यस्य सरस्वतीरसं दृष्ट्वा।
पातालतलं गुप्तं निलीय तिष्ठत्यधोऽमृतम् ॥२४॥

तत्तो कीरी दाहिणचरणं उप्पाडिउं महीनाहं ।
नमिऊणं भत्तीए सुललियवयणेहिं वण्णेइ ॥२५॥

अवइन्ना वाएसरि मुहकमले जस्स रायहंसि व्व ।
सो जयउ सच्चसंधो राया नयमग्गनहचंदो ॥२६॥

कोऊहलेण कलिओ राया वाहरइ कीरमिहुणं तं ।
आगच्छसु मह पासे साहसु कज्जं तहा निययं ॥२७॥

तेहि वि निए विवाए कहिए राया निएइ मंतिमुहं ।
सो वि हु साहइ एसिं मज्झण्हे उत्तरं देमो ॥२८॥

अच्छरियभरियमणो राया तं मिहुणयं गिहे नेउं ।
कूरजुएहिं दाडिमकुलेहिं भोयइ जहिच्छाए ॥२९॥

अत्थाणे मज्झण्हे उवविट्ठे नरवरंमि मंतिजणो ।
जंपइ कीरविवाओ एस अउव्वो असुयपुव्वो ॥३०॥

सुइरं वियारयंता अवि नो पारं गया इमस्सऽम्हे ।
ता गंतूणं अन्नत्थ नाणिणं कं पि पुच्छंतु ॥३१॥

तो रोसारुणनयणो राया मइगव्वपव्वयारूढो ।
तज्जेइ मंतिवग्गं अहो अहो तुम्ह मइविहवो ॥३२॥

दिव्ववसा जइ एसो कीरविवाओ अणिच्छिओ इत्तो ।
अन्नत्थ पुरे गच्छइ ता लज्जा आजुगंतं मे ॥३३॥

अहवा कित्तियमित्तो एस विवाओ सुबुद्धिमंताणं? ।
तम्हा सुणेह सवणे पउणे काऊण मह वयणं ॥३४॥

बीयं खु बीयवइणो हवेइ लोए वि सुप्पसिद्धमिणं ।
खित्ताहिवस्स व जहा खित्तं इत्थं पि तं मुणह ॥३५॥

कीरी नियसरीरं खित्तं गहिऊण जाउ सच्छंदं ।
तणओ कीरस्स इमो इय नीइं मुणह सव्वत्थ ॥३६॥

कीरी विसन्नचित्ता पभणइ रायं! न एरिसा नीई ।
तुम्हाण काउमुचिया सत्थस्सऽत्थाण पडिकूला ॥३७॥

ततः कीरी दक्षिणचरणमुत्पाट्य महीनाथम् ।
नत्वा भक्त्या सुललितवचनैर्वर्णयति ॥२५॥

अवतीर्णा वागीश्वरी मुखकमले यस्य राजहंसीव ।
स जयतु सत्यसन्धो राजा नयमार्गनभश्चन्द्रः ॥२६॥

कौतूहलेन कलितो राजा व्याहरति कीरमिथुनं तत् ।
आगच्छ मम पार्श्वे कथय कार्यं तथा निजकम् ॥२७॥

ताभ्यामपि निजे विवादे कथिते राजा पश्यति मन्त्रिमुखम् ।
सोऽपि खलु कथयत्येतयोर्मध्याह्ने उत्तरं दास्यामः ॥२८॥

आश्चर्यभृतमना राजा तन्मिथुनकं गृहे नीत्वा ।
कूरयुतैर्दाडिमकुलैर्भोजयति यथेच्छया ॥२९॥

आस्थाने मध्याह्ने उपविष्टे नरवरे मन्त्रिजनः ।
जल्पति कीरविवाद एषोऽपूर्वोऽश्रुतपूर्वः ॥३०॥

सुचिरं विचारयन्तोऽपि न पारं गता अस्य वयम् ।
ततः गत्वाऽन्यत्र ज्ञानिनं कमपि पृच्छन्तु ॥३१॥

ततो रोषारुणनयनो राजा मतिगर्वपर्वतारूढः ।
तर्जयति मन्त्रिवर्गमहो! अहो! युष्माकं मतिविभवः ॥३२॥

दैववशात् यद्येष कीरविवादोऽनिश्चित इतः ।
अन्यत्र पुरे गच्छति तर्हि लज्जाऽऽयुगान्तं मे ॥३३॥

अथवा कियन्मात्र एष विवादः सुबुद्धिमताम् ।
तस्माच्छृणुत श्रवणे प्रगुणे कृत्वा मम वचनम् ॥३४॥

बीजं खलु बीजपतेर्भवति लोकेऽपि सुप्रसिद्धमिदम् ।
क्षेत्राधिपस्येव यथा क्षेत्रमत्राऽपि तज्जानीत ॥३५॥

कीरी निजकशरीरं क्षेत्रं गृहीत्वा यातु स्वच्छन्दम् ।
तनयः कीरस्याऽयमिति नीतिं जानीत सर्वत्र ॥३६॥

कीरी विषण्णचित्ता प्रभणति राजन्! नेदृशी नीतिः ।
युष्माकं कर्तुमुचिता शास्त्रस्याऽर्थानां प्रतिकूला ॥३७॥

एयं चिय नयमग्गं पयासियं नाह ! निययपंचउले ।
वहियाए लेहावसु जेण तुमाणं न वीसरइ ॥३८॥

तो अहिमाणवसेणं, नियभणियं अवितहं व मन्नंतो ।
लेहावइ वहियाए नरराओ नियअमच्चाओ ॥३९॥

तथाहि - बीजिन एव हि बीजं क्षेत्रं भवति तद्वतामेव ।
दुर्ललितमहीपालो निर्णयमेवं स्वयं चक्रे ॥४०॥

सुणिउं निवकयनीइं नीसासपरा विमुक्कपुत्ता सा ।
धरणिं धस त्ति पडिया कीरी तरुछिन्नसाह व्व ॥४१॥

कीरोऽवि तम्मि समये निट्ठुरचित्तो गहित्तु तं पुत्तं ।
दीणमुहं चइय पियं स झत्ति पत्तो मलयसेलं ॥४२॥

सीयलउवयारेहिं मंतिपउत्तेहिं पत्तयेचन्ना ।
लोएहिं ससोएहिं दिट्ठा कीरी वि उड्डीणा ॥४३॥

सा सत्तुंजयतित्थे समत्थतित्थाण सेहरसरिच्छे ।
गंतुं पणमइ रिसहं भत्तीए उसहसेणजुयं ॥४४॥

चउविहमवि आहारं चइत्तु नवकारसुमरणुज्जुत्ता ।
चित्तंमि भावणाओ भावइ सा भवभउविग्गा ॥४५॥

न गिहं न य भत्तारो न य सुयणा नेय अंगजाओऽवि ।
सरणं इह संसारे एगं मह जिणमयं मुत्तुं ॥४६॥

सा पुण दुल्ललियनिवे गयचित्ता झत्ति भवविरत्ता वि ।
विहिविहियपाणचाया मज्झिमपरिणामजोएणं ॥४७॥

कंचीए नयरीए समग्गतिहुयणसिरीण कंचीए ।
उप्पन्ना कयपुण्णा सिरिचंदणसारसिट्ठिगिहे ॥४८॥

बहुपुत्ताणं उवरिं जाया अइवल्लहा पिऊणं सा ।
नामेण चंदलेहा नमणिज्जा चंदलेह व्व ॥४९॥ कुलयं ॥

पुव्वभवब्भासेण य जिणधम्मरया सभावओ जाया ।
उप्पन्नजाइसरणा कीरभवं जाणइ असेसं ॥५०॥

एनमेव नयमार्गं प्रकाशितं नाथ ! निजकपञ्चकुले ।
वहिकायां लेखयतु येन भवतो न विस्मरति ॥३८॥

ततोऽभिमानवशेन निजभणितमवितथमिव मन्वानः ।
लेखयति वहिकायां नरराजो निजामात्यतः ॥३९॥

तथाहि - बीजिन एव हि बीजं क्षेत्रं भवति तद्वतामेव ।
दुर्ललितमहीपालो निर्णयमेवं स्वयं चक्रे ॥४०॥

श्रुत्वा नृपकृतनीतिं निःश्वासपरा विमुक्तपुत्रा सा ।
धरण्यां "धस" इति पतिता कीरी तरुच्छिन्नशाखेव ॥४१॥

कीरोऽपि तस्मिन् समये निष्ठुरचित्तो गृहीत्वा तं पुत्रम् ।
दीनमुखीं त्यक्त्वा प्रियां स झटिति प्राप्तो मलयशैलम् ॥४२॥

शीतलोपचारैर्मन्त्रिप्रयुक्तैः प्राप्तचैतन्या ।
लोकैः सशोकैर्दृष्टा कीर्यप्युड्डीना ॥४३॥

सा शत्रुञ्जयतीर्थे समस्ततीर्थाणां शेखरसदृशे ।
गत्वा प्रणमति वृषभं भक्त्या वृषभसेनयुतम् ॥४४॥

चतुर्विधमप्याऽऽहारं त्यक्त्वा नमस्कारस्मरणोद्युक्ता ।
चित्ते भावना भावयति सा भवभयोद्विग्ना ॥४५।

न गृहं न च भर्ता न च स्वजना नैव अङ्गजातोऽपि ।
शरणमिह संसारे एकं मम जिनमतं मुक्त्वा ॥४६॥

सा पुनर्दुर्ललितनृपे गतचित्ता झटिति भवविरक्ताऽपि ।
विधिविहितप्राणत्यागा मध्यमपरिणामयोगेन ॥४७॥

काञ्च्यां नगर्यां समग्रत्रिभुवनश्रियः काञ्च्याम् ।
उत्पन्ना कृतपुण्या श्रीचन्दनसारश्रेष्ठिगृहे ॥४८॥

बहुपुत्राणामुपरि जाताऽतिवल्लभा पित्रोः सा ।
नाम्ना चन्द्रलेखा नमनीया चन्द्रलेखेव ॥४९॥ कुलकं ॥

पूर्वभवाभ्यासेन च जिनधर्मरता स्वभावतो जाता ।
उत्पन्नजातिस्मरणा कीरभवं जानात्यशेषम् ॥५०॥

सम्मद्दंसणरम्मं जिणवरधम्मं करेइ सा बाला।
पढइ गुणेई सत्थं अज्जियजणनिच्चसेवाए ॥५१॥

जिणमयवियारसुंदरकम्मप्पयडीमुहेसु गंथेसुं।
कुसलत्तं संपाविय विउसाणं अग्गिमा जाया ॥५२॥

घरकम्मधम्मकज्जे जाया सव्वत्थ पुच्छणिज्जा सा।

पावेइ गउरवं पुण गुणनिवहो इत्थ किं चुज्जं? ॥५३॥

अन्नदिणे नियजणयं विन्नविउं तीइ तेजदेसाउ।
आणाविया तुरंगा रविरहतुरयाण गव्वहरा ॥५४॥

सेराहा खुंगाहा हंसुलया उक्कनाह वुल्लाहा।
नीलुय-कालुयपमुहा बहुवेगा लक्खणोवेया ॥५५॥जुयलं॥

ते पुरपरिसरसरियातीरे बंधाविया तरुच्छाए।
दिट्ठा कस्स न चित्तं हरंति सुररायतुरय व्व ? ॥५६॥

अन्नदियसंमि राया अच्चब्भुयकोउगाउलियचित्तो।
पिक्खइ ते वरतुरए विहगाहिवविजयवेगधरे ॥५७॥

मुल्लेण अतुल्लेणवि मग्गइ आसे सयं महाराओ।
सिट्ठी वि नेव वियरइ धूयाए वारिओ संतो ॥५८॥

अन्नदिणे तणयाए वयणेणं देइ नियवरकिसोरे।
गब्भकए तुरगीणं सिट्ठी अब्भत्थिओ रण्णा ॥५९॥

पइवच्छरं किसोरा रण्णा संचारिया किसोरीणं।
जा पंच वच्छराइं तत्तो जाया हया बहवे ॥६०॥

अह चंदलेहकन्ना जंपइ तायं किसोरएहि मह।
रण्णो जे संजाया तुरया ते लेसु सव्वेऽवि ॥६१॥

रुट्ठो राया जइया तुमं धरावेइ भणइ वा किं पि।
तइया भणियव्वो सो जं - मुणइ सुया मह रहस्सं ॥६२॥

धूयावयणेण तओ नियतुरयसमुब्भया य जे तुरया।
नीरं पाउमुवेया नईइ ते सिट्ठिणा हरिया ॥६३॥

सम्यग्दर्शनरम्यं जिनवरधर्मं करोति सा बाला।
पठति गुणयति शास्त्रमार्यिकाजननित्यसेवया ॥५१॥

जिनमतविचारसुन्दरकर्मप्रकृतिमुखेषु ग्रन्थेषु।
कुशलत्वं संप्राप्य विदुषामग्रिमा जाता ॥५२॥

गृहकर्म-धर्मकार्ये जाता सर्वत्र प्रच्छनीया सा।
प्राप्नोति गौरवं पुनर्गुणनिवहोऽत्र किमाश्चर्यम् ॥५३॥

अन्यदिने निजजनकं विज्ञाप्य तया तेजकदेशात्।
आनायितास्तुरङ्गा रविरथतुरगाणां गर्वहराः ॥५४॥

सेराहाः खुङ्गाहा हंसुलका उक्कनाह-बोल्लाहाः।
नीलुक-कालुकप्रमुखा बहुवेगा लक्षणोपेताः ॥५५॥युगलम्॥

ते पुरपरिसरसरित्तीरे बन्धितास्तरुच्छायायाम्।
दृष्टाः कस्य न चित्तं हरन्ति सुरराजतुरङ्गा इव ? ॥५६॥

अन्यदिवसे राजाऽत्यद्भुतकौतुककलितचित्तः।
प्रेक्षते तान् वरतुरगान् विहगाधिपविजयवेगधरान् ॥५७॥

मूल्येनाऽतुल्येनापि मार्गयत्यश्वान् स्वयं महाराजः।
श्रेष्ठ्यपि नैव वितरति दुहित्रा वारितः सन् ॥५८॥

अन्यदिने तनयाया वचनेन ददाति निजवरकिशोरान्।
गर्भकृते तुरगीणां श्रेष्ठ्यभ्यर्थितो राज्ञा ॥५९॥

प्रतिवत्सरं किशोरा राज्ञा सञ्चारिता किशोरीणाम्।
यावत् पञ्च वत्सराणि ततो जाता हया बहवः ॥६०॥

अथ चन्द्रलेखाकन्या जल्पति तातं - किशोरैर्मम।
राज्ञो ये संजातास्तुरगास्ताँल्लाहि सर्वानपि ॥६१॥

रुष्टो राजा यदा त्वां धारयति भणति वा किमपि।
तदा भणितव्यः स - यज्जानाति सुता मम रहस्यम् ॥६२॥

दुहितृवचनेन ततो निजतुरगसमुद्भवाश्च ये तुरगाः।
नीरं पातुमुपेता नद्यास्ते श्रेष्ठिना हृताः ॥६३॥

सिट्ठिसुहडेहिं तासियपंडववयणेहि नरवरो रुट्ठो ।
सिट्ठिं आहविऊणं भणइ कहं मह हया हरिया ।।६४।।

साहइ चंदणसारो नाऽहं जाणामि किं पि परमत्थं ।
मह कन्ना उण विन्ना सामिय ! तुह उत्तरं दाही ।।६५।।

अच्छरियपूरिओ तं पडिहारं पेसिऊण सिट्ठिसुयं ।
आणावइ नरनाहो अत्थाणे बहुजणाइन्ने ।।६६।।

फुल्लकरंडयतंबोलतालंयटाइकलियआलीहिं ।
सहिया सुहासणत्था बहुपरियणपरिगया सुहया ।।६७।।

कप्पलया इय दाणं दिंती कित्तिं जए पयासंती ।
वण्णिज्जंती मागहजणेहिं सा निवसहं पत्ता ।।६८।।जुयलं।।

एसा अज्ज वि कन्ना दुद्धमुही नरवरस्स किं दाही ।
उत्तरमिय नयरजणो कुऊहलेणं मिलइ तत्थ ।।६९।।

साऽवि नमंसिय रायं उवविट्ठा नियपिउस्स उच्छंगे ।
